॥ दुर्गासप्तसती ॥

4 JUL 19

ॐ नमश्चण्डिकायै ॥ अथ कीलकम् ॥ विशुद्धज्ञा-
नदेहाय त्रिवेदीदिव्यचक्षुषे ॥ श्रेयःप्राप्तिनिमित्ताय नमः
सोमार्धधारिणे ॥ सर्वदैव पठेद्यस्तु मन्त्राणामपि कीलकम् । सो
ऽपि क्षेममवाप्नोति सततं जपतत्परः ॥ सिध्यन्त्युच्चाटनादीनि व-
स्तूनि सकलान्यपि । एतेन स्तुवतान्देवीं स्तोत्रवृन्देन सिध्यति ॥
न मन्त्रो नौषधन्तत्र न किंचिदपि विद्यते । विना जप्येन सिध्ये-
त सर्वमुच्चाटनादिकम् ॥ समग्राण्यपि सेत्स्यन्ति लोके शंकामिमां
हरः ॥ कृत्वा निमन्त्रयामास सर्वमेवमिदं शुभम् ॥ स्तोत्रं वै च-
ण्डिकायास्तु तच्च गुप्तञ्चकार सः ॥ समाप्नोति सुपुण्येन तां यथाव-
न्निमन्त्रणाम् ॥ सो ऽपि क्षेममवाप्नोति सर्वमेतन्न संशयः ॥ कृष्णा-

यां वा चतुर्दश्यामष्टम्यां वा समाहितः । ददाति प्रतिगृह्णाति नान्यथैषा प्रसिध्यति ॥ इत्थंरूपेण कीलेन महादेवेन कीलितम् । स एव क्षेममाप्नोति सदा जप्त्वा न संशयः । यो निःकीलां विधायैनां नित्यं जपति संस्फुटम् ॥ स सिद्धस्सगणस्सोऽपि गन्धर्वो जायते नरः । न चैवाप्यटतस्तस्य भयं क्वापि हि जायते ॥ नापमृत्युवशं याति मृतो मोक्षमवाप्नुयात् ॥ ज्ञात्वा प्रारभ्य कुर्वीत ह्यकुर्वाणो विनश्यति ॥ ततो ज्ञात्वैव सम्पन्नमिदम् प्रारभ्यते जनैः ॥ सौभाग्यादि च यत्किंचिद् दृश्यते ललनाजने ॥ तत्सर्वं तत्प्रसादेन तेन जाप्यमिदं शुभम् । शनैस्तु जप्यमानेऽस्मिँस्तोत्रे सम्पत्तिरुच्चकैः ॥ भवत्येव समग्रा अपि ततः प्रारभ्यमेव तत् ॥ ऐश्वर्य्यन्तत्प्रसादेन

अथ कवचम् ॥ मार्कण्डेय उवाच ॥ यद् गुह्यम् परमं लोके सर्वरक्षाकरं नृणाम्। यन्न कस्यचिदाख्यातं तन्मे ब्रूहि पितामह ॥ ब्रह्मोवाच ॥ अस्ति गुह्यतमं विप्र सर्वभूतोपकाकरम्। देव्यास्तु कवचम् पुण्यं तच्छृणुष्व महामुने ॥ प्रथमं शैलपुत्री च द्वितियम् ब्रह्मचारिणी। तृतीयं चण्डघण्टेति कूष्माण्डेति चतुर्थकम् ॥ पंचमं स्कन्दमातेति षष्ठं कात्यायनीति च। सप्तमं कालरात्री च महागौरीति चाष्टमम्। नवमं सिद्धिदात्री च नवदुर्गाः प्रकीर्तिताः ॥ उक्तान्येतानि नामानि ब्रह्मणैव महात्मना। अग्निना दह्यमानस्तु शत्रुमध्ये गतो रणे। विषमे दुर्गमे वापि भयार्ताश्शरणं गताः ॥ न तेषां जायते किंचिदशुभं रणसंकटे। नापदं तस्य पश्यामि शोकदुःखभयन्नहि ॥ यैस्तु भक्त्या

स्मृता नूनं तेषां सिद्धिः प्रजायते । प्रेतसंस्था तु चामुण्डा वाराही महिषासना । ऐन्द्री गजसमारूढा वैष्णवी गरुडासना । माहेश्वरी वृषारूढा कौमारी शिखिवाहना । ब्राह्मी हंससमारूढा सर्वाभरणभूषिता । लक्ष्मीः पद्मासना देवी पद्महस्ता हरिप्रिया ॥ श्वेतरूपधरा देवी ईश्वरी वृषवाहना । इत्येता मातरस्सर्वाःसर्वयोगसमन्विताः ॥ श्रेष्ठस्कमौक्तिकैस्सर्वा दिव्यंहारप्रलम्बिभिः । इन्द्रनीलैर्महानीलैः पद्मरागैः सुशोभितैः ॥ नानाभरणशोभाढ्या नानारत्नोपशोभिताः ॥ दृश्यन्ते रथमारूढा देव्यः क्रोधसमाकुलाः ॥ शंखं चक्रं गदां शक्तिं हलं च मुसलायुधम् । खेटकं तोमरञ्चैव परशुम् पाशमेव च । कुन्तायुधं च खड्गंच शार्ङ्गमायुधमुत्तमम् । कुलि-

शङ्खं च त्रिशूलं च पट्टिशम्मुद्गरन्तथा। दैत्यानान्देहनाशाय भक्तानाम-
भयाय च । धारयन्त्या ऽयुधानीत्थं देवानान्तु हितायै वै। नमस्ते
ऽस्तु महारौद्रे महाघोरपराक्रमे। महाबले महाकाये महाभयविना-
शिनि ॥ त्राहि मां देवि दुष्प्रेक्ष्ये शत्रूणाम् भयवर्द्धिनि। प्राच्यां र-
क्षतु मामैन्द्री आग्नेय्यामग्निदेवता। याम्यां रक्षतु वाराही नैर्ऋत्यां
खड्गधारिणी। प्रतीच्यां वारुणी रक्षेद्वायव्याम् मृगवाहिनी। उदी-
च्यां रक्षतु कौमारी ऐशान्यां शूलधारिणी। ऊर्द्ध्वम् ब्राह्मी च मे र-
क्षेदधस्ताद्वैष्णवी तथा। एवं दशदिशो रक्षेच्चामुण्डा शववाहना ॥
जया मे चाग्रतः पातु विजया पातु पृष्ठतः । अजिता वामपार्श्वे तु
दक्षिणे चापराजिता। शिखामुद्योतिनी रक्षेदुमा मूर्ध्नि व्यवस्थि-

ता। मालाधरी ललाटे तु भ्रुवोर्म्मध्ये यशस्विनी। त्रिनेत्रा च भ्रुवौ रक्षेद्यमघण्टा च नासिके। शंखिनी चक्षुषोर्मध्ये श्रोत्रयोर्द्वारवासिनी। कपोलौ कालिका रक्षेत्कर्णमूले तु शांकरी॥ नासिकायां सुगन्धा च उत्तरौष्ठे च चर्चिका। अधरे चामृतकला जिह्वायां तु सरस्वती॥ दन्तान्रक्षतु कौमारी कण्ठमध्ये तु चण्डिका। घण्टिकां चित्रघण्टा च महामाया च तालुके। कामाख्या चिबुकं रक्षेद्वाचम्मे सर्वमङ्गला॥ ग्रीवायाम् भद्रकाली च पृष्ठदेशे धनुर्द्धरी। नीलग्रीवा वहिष्कण्ठे नलिकां नलकूवरी॥ खड्गधारिण्यूभौ स्कन्धौ बाहू मे वज्रधारिणी। हस्तयोर्द्दण्डिनी रक्षेदम्बिका चाङ्गुलीषु च। नखाञ्छूलेश्वरी रक्षेत्कुक्षौ रक्षेन्नलेश्वरी। स्तनौ रक्षेन्महादेवी मनश्शोकविना-

शिनी । हृदये ललिता देवी उदरे शूलधारिणी। नाभौ च कामिनी
रक्षेद् गुह्यं गुह्येश्वरी तथा । पूतना कामिका मेढ्रे गुदे महिषवाहि-
नी । कट्याम् भगवती रक्षेज्जानुनी विन्ध्यवासिनी । जङ्घे महाबला
रक्षेत्सर्वकामप्रदायिनी । गुल्फयोर्नारसिंही च पादपृष्ठे च तैजसी।
पादाङ्गुलीः श्रीधरी रक्षेत्पादाधस्तलवासिनी । नखान् दंष्ट्राकराली
च केशांश्चैवोर्ध्वकेशिनी। रोमकूपेषु कौमारी त्वचं वागीश्वरी तथा।
रक्तमज्जावसामांसान्यस्थिमेदांसि पार्वती । अन्त्राणि कालरात्री
च पित्तं च मुकुटेश्वरी । पद्मावती पद्मकोशे कफे चूडामणिस्त-
था । ज्वालामुखी नखज्वालामभेद्या सर्वसन्धिषु । शुक्रं ब्रह्माणी
मे रक्षेच्छायां छत्रेश्वरी तथा । अहंकारम् मनो बुद्धिं रक्षेन्मे धर्मधा-

रिणी । प्राणापानौ तथा व्यानमुदानञ्च समानकम् । वज्रहस्ता च मे रक्षेत्प्राणं कल्याणदायिनी । रसे रूपे च गन्धे च शब्दस्पर्शे च योगिनी । सत्त्वं रजस्तमश्चैव रक्षेन्नारायणी सदा । आयू रक्षतु वाराही धर्म्मं रक्षतु वैष्णवी । यशः कीर्तिञ्च लक्ष्मीञ्च सदा रक्षन्तु मातरः । गोत्रमिन्द्राणी मे रक्षेत्पशून्रक्षतु चण्डिका । पुत्रान्रक्षेन्महालक्ष्मीर्भार्यां रक्षतु वैष्णवी । धनं धनेश्वरी रक्षेत्कौमारी कन्यकान्तथा । पन्थानं सुपथा रक्षेन्मार्गं क्षेमंकरी तथा । राजद्वारे महालक्ष्मीर्विजया सर्वतः स्थिता । रक्षेन्मे सर्वगात्राणि दुर्गा दुर्गापहारिणी । रक्षाहीनन्तु यत् स्थानं वर्जितं कवचेन च ॥ सर्वं रक्षतु मे देवी जयन्ती पापनाशिनी । पदमेकन्न गच्छेत्तु यदीच्छेच्छुभमात्मनः । क-

वचेनावृतो नित्यं यत्र यत्रैव गच्छति। तत्र,तत्रार्थलाभश्च विजयस्सा-
र्वकामिकः। यं यं चिन्तयते,कामं तन्तम् प्राप्नोति मानवः॥ परमै-
श्वर्यमतुलम् प्राप्नोत्यविकलः पुमान्। निर्भयो जायते मर्त्यः संग्रामे-
ष्वपराजितः। त्रैलोक्ये स भवेत्पूज्यः कवचेनावृतः पुमान्। इदन्तु
देव्याः कवचं देवानामपि दुर्लभम्। य इदं कवचं धृत्वा संग्रामम् प्र-
विशेन्नरः। जित्वा च स रिपून्सर्वान् कल्याणी गृहमाप्नुयात्। यः प-
ठेत्प्रयतो नित्यं त्रिसन्ध्यं श्रद्धयाऽन्वितः॥ दैवीकला भवेत्तस्य त्रैलो-
क्ये चापराजितः। जीवेद्वर्षशतं साग्रमपमृत्युविवर्जितः। नश्यन्ति
व्याधयस्सर्वे लूताविस्फोटकादयः। स्थावरं जङ्गमं चापि कृत्रिमं
चापि यद्विषम्। अभिचाराणि सर्वाणि मन्त्रयन्त्राणि भूतले। भूचराः

खेचराश्चैव सर्वजाश्चोपदेशिकाः । सहजा कुलजा माला डाकिनी
शाकिनीति च। अन्तरीक्षचरा घोरा डाकिन्यश्चमहाबलाः॥ ग्रहभूत-
पिशाचाश्च यक्षगन्धर्वराक्षसाः । ब्रह्मराक्षसवेतालाः कूष्माण्डा भै-
रवादयः ॥ नश्यन्ति दर्शनात्तस्य कवचे हृदि संस्थिते ॥ मानोन्न-
तिर्भवेद्राज्ञस्तेजोवृद्धिः परा भवेत् ॥ यशसा वर्धते सो ऽपि की-
र्तिमण्डितभूतले ॥तस्माज्जपेत्सदा भक्त्या कवचं कामदम् मुने ॥ ज-
पेत्सप्तशतीञ्चण्डीं कृत्वा कवचमग्रतः । अविघ्नेन भवेत्सिद्धिश्चण्डी-
जपसमुद्भवा । यावद् भूमण्डलं धत्ते सशैलवनकाननम् । तावत्तिष्ठ-
ति मेदिन्यां सन्ततिः पुत्रपौत्रिकी । देहान्ते परमं स्थानं यत्सुरैर-
पि दुर्लभम् । प्राप्नोति पुरुषो नित्यम् महामायाप्रसादतः ॥ इति श्री

देव्याः कवचम् ॥ ॥ ॥ ॥

—(*)—

ॐ नमश्चण्डिकायै ॥ मार्कण्डेय उवाच ॥ ब्रह्मन् केन प्रकारेण दुर्गामाहात्म्यमुत्तमम् । शीघ्रं सिध्यति तत्सर्वं कथयस्व महामते ॥ ब्रह्मोवाच ॥ अर्गलं कीलकं चादौ जपित्वा कवचम् पठेत् । जपेत्सप्तशतीम् पश्चात्क्रम एष शिवोदितः ॥ अर्गलं दुरितं हन्ति कीलकम् फलदम् भवेत् । कवचं रक्षते नित्यं चण्डिका त्रितयं तथा ॥ अर्गलं हृदये यस्य तथानर्गलवागसौ । भविष्यतीति निश्चित्य शिवेन कथितम् पुरा ॥ कीलकं हृदये यस्य स कीलितमनोरथः । भविष्यति न सन्देहो नान्यथा शिवभाषितम् ॥ कवचं हृदये यस्य स वज्रकवचः खलु । भविष्यतीति निश्चित्य ब्रह्मणा निर्मितम् पुरा ॥ मार्कण्डेय उवाच ॥ जय त्वन्देवि चामुण्डे जय भूतान्तकारिणि ।

अ० जय सर्वगते देवि कालरात्रि नमोऽस्तु ते ॥ जयन्ती मङ्गला काली
भद्रकाली कपालिनी । दुर्गा क्षमा शिवा धात्री स्वधा स्वाहा नमो
॥१॥ ऽस्तु ते ॥ मधुकैटभविद्रावविधात्रि वरदे नमः । रूपन्देहि जयन्दे-
हि यशो देहि द्विषो जहि ॥ महिषासुरसैन्यान्तविधात्रि वरदे-
नमः। रूपन्देहि० ॥ महिषासुरनिर्णाशविधात्रि वरदे नमः। रूपदेहि०॥
धूम्रलोचनदर्पान्तविधात्रि वरदे नमः ॥ रूपन्देहि० ॥ चण्डमुण्डप्रम-
थनविधात्रि वरदे नमः॥ रूपन्देहि० ॥ रक्तबीजकुलोच्छेदविधात्रि वर-
दे नमः ॥ रूपन्देहि० ॥ निशुम्भप्राणसंहारविधात्रि वरदे नमः ॥ रूप-
न्देहि० ॥ शुम्भराक्षसंहारविधात्रि वरदे नमः॥ रूपन्देहि० ॥ वन्दितां-
घ्रियुगे श्रीदे देवि सौभाग्यदायिनि रूपन्देहि० ॥ अचिन्त्यरूपच- ॥१॥

रिते सर्वशत्रुविनाशिनि ॥ रूपन्देहि० ॥ देहि सौभाग्यमारोग्यन्देहि देवि परं सुखम् ॥ रूपन्देहि० ॥ विधेहि द्विषतान्नाशं विधेहि बलमुच्चकैः ॥ रूपन्देहि० ॥ विधेहि देवि कल्याणं विधेहि विपुलां श्रियम् ॥ रूपन्देहि० ॥ देवि प्रचण्डदोर्दण्डदैत्यदर्पविनाशिनि । रूपन्देहि० ॥ देवि भक्तजनोद्दामदत्तानन्दोदये ऽम्बिके । रूपन्देहि० ॥ नतेभ्यः सर्वदा भक्त्या चण्डिके दुरितापहे । रूपन्देहि० ॥ स्तुवद्भ्यो भक्तिपूर्वन्त्वां चण्डिके व्याधिनाशिनि । रूपन्देहि० ॥ चण्डिके सततं ये त्वामर्चयन्तीह भक्तितः ॥ रूपन्देहि० ॥ सुरासुरशिरोरत्ननिघृष्टचरणाम्बुजे ॥ रूपन्देहि० ॥ विद्यावन्तं यशस्वन्तं लक्ष्मीवन्तं जनं कुरु ॥ रूपन्देहि० ॥ प्रचण्डदैत्यदर्पघ्नि चण्डिके प्रणता वयम् ॥ रूपन्देहि० ॥ चतुर्भुजे चतुर्व

कसंस्तुते परमेश्वरि ॥ रूपन्देहि० ॥ कृष्णेन संस्तुते देवि सश्वद्भ-
क्त्या सदाऽम्बिके ॥ रूपन्देहि० ॥ हिमाचलसुतानाथसंस्तुते पर-
मेश्वरि ॥ रूपन्देहि० ॥ इन्द्राणीपतिसद्भावपूजिते परमेश्व-
रि ॥ रूपन्देहि ॥ पत्नीम् मनोरमान्देहि मनोवृत्तानुसारिणीम् ॥
तारिणीं दुर्गसंसारसागरस्य कुलोद्भवाम् ॥ इदं स्तोत्रम् पठित्वा
तु महास्तोत्रम् पठेन्नरः ॥ स तु सप्तशतीसंख्यावरमाप्नोति सम्प-
दः ॥ अर्गलम् पापजातस्य दारिद्र्यस्य तथाऽर्गलम् । इदमादौ प-
ठित्वा तु पश्चाच्छ्रीचण्डिकाम् पठेत् ॥ इत्यर्गलास्तोत्रम् ॥

ॐनमश्चण्डिकायै। ॐ अहं रुद्रेभिरित्यस्य वागाम्भृणी ऋषिः त्रिष्टुप् छन्दो वागाम्भृणी देवता देवीसूक्तजपे विनियोगः ॥ ॐअहं रुद्रेभिर्वसुभिश्चराम्यहमादित्यैरुत विश्वदेवैः ॥ अहम् मित्रावरुणो भाविभर्म्यहमिन्द्राग्नी अहमश्विनोभा ॥ १ ॥ अहं सोममाहनसंविभर्म्यहन्त्वष्टारमुत पूषणम् भगम् ॥ अहन्दधामि द्रविणं हविष्मते सुप्राव्ये यजमानाय सुन्वते ॥ २ ॥ अहं राष्ट्रीसङ्गमनी वसूनाञ्चिकितुषी प्रथमा यज्ञियानां ताम्मा देवा व्यदधुः पुरुत्रा भूरिस्थात्रांभूर्यावेशयन्तम् ॥३॥ मया सोऽन्नमात्ति योविपश्यति यः प्राणिति यई शृणोत्युक्तम् ॥ अमन्तवोमान्तउपक्षीयन्ति श्रुधिश्रुतःश्रद्धिवन्ते वदामि॥४॥अहमेव स्वयमिदं वदामि जुष्टे

देवेभिरुत मानुषेभिः । यं कामये तन्तमुग्रं कृणोमि तम् ब्रह्माणं तमृषिं तं सुमेधाम् ॥५॥ अहं रुद्राय धनुरातनोमि ब्रह्मद्विषे शरवे ह-न्तवा उ अहं जनाय समदं कृणोम्यहं द्यावापृथिवी आविवेश ॥६॥ अहं सुवे पितरमस्य मूर्धन्मम योनिरप्स्वन्तः समुद्रे. ततो वितिष्ठे भु-वनानुविश्वोतामून्द्यां वर्ष्मणोपस्पृशामि ॥७॥ अहमेव वात इव प्रवाम्यारभमाणा भुवनानि विश्वापरोदिवापर एना पृथिव्यै ता वती महिनासम्बभूव ॥ इति श्रीदेवीसूक्तम् ॥

समाप्त

ॐनमो दुर्गायै ॥ ॐचण्डीशापविमोचनमन्त्रस्य वशिष्ठनारद-सामवेदाधिपतिब्रह्मऋषयो गायत्रीच्छन्दः सर्वैश्वर्यकारिणी श्रीदुर्गा देवता अनुष्टुप्छन्दश्चरितत्रयम् बीजं ह्रीँ शक्तिरूपिणी चण्डीशापविमोचने विनियोगः। ॐरीँ रेतःस्वरूपायै मधुकैटभमर्दिन्यै ब्रह्मशाप विमुक्ता भव॥ ॐश्रीँ बुद्धिरूपिण्यै महिषासुरसैन्यनाशिन्यै ब्रह्मशापविमुक्ता भव॥ ॐरँ रक्तरूपिण्यै महिषासुरमर्दिन्यै ब्रह्मशापविमुक्ता भव ॥ ॐ क्षुँ क्षुधारूपिण्यै देववन्दिन्यै ब्रह्मशापविमुक्ता भव ॥ ॐछाँ छायारूपिण्यै दूतसंवादिन्यै ब्रह्मशापविमुक्ता भव ॥ ॐ श्रीँ शक्तिरूपिण्यै धूम्रलोचनघातिन्यै ब्रह्मशापविमुक्ता भव ॥ ॐतृँ तृषारूपिण्यै चण्डमुण्डवधकारिण्यै ब्रह्मशापविमुक्ता भव ॥

ॐक्षाँ क्षान्तिरूपिण्यै रक्तबीजवधकारिण्यै ब्रह्मशापविमुक्ता भव ॥
ॐजाँ जातिरूपिण्यै निशुम्भवधकारिण्यै ब्रह्मशापविमुक्ता भव ॥
ॐलँ लज्जारूपिण्यै शुम्भवधकारिण्यै ब्रह्मशापविमुक्ता भव ॥
ॐशाँ शान्तिरूपिण्यै देवस्तुत्यै ब्रह्मशापविमुक्ता भव ॥ ॐश्रं श्र-
द्धारूपिण्यै फलदात्र्यै ब्रह्मशापविमुक्ता भव ॥ ॐकाँ कान्तिरूपि-
ण्यै राजवरदात्र्यै ब्रह्मशापविमुक्ता भव ॥ ॐमाँ मातृरूपिण्यै अ-
र्गलसहितायै ब्रह्मशापविमुक्ता भव ॥ ॐह्रीँश्रीँहूँदुर्गायै सर्वै-
श्वर्यकारिण्यै ब्रह्मशापविमुक्ता भव ॥ क्लीँह्रीँॐनमः शिवा-
यै अभेदकवचरूपिण्यै ब्रह्मशापविमुक्ता भव ॥ ॐकाल्यै कालिह्रीँ
फट्स्वाहायै ऋग्वेदरूपिण्यै ब्रह्मशापविमुक्ता भव ॥ इत्येवं हि महा-

मन्त्रान् पठित्वा परमेश्वरि । चण्डीपाठं दिवारात्रौ कुर्यादेव न संशयः ॥ एवम् मन्त्रं न जानाति चण्डीपाठं करोति यः । आत्मनश्चैव दातॄणां क्षयं कुर्यान्न संशयः ॥*॥ ॥*॥ ॥*॥

इति श्रीरुद्रयामले चण्डीशापविमोचनम् ॥

—*—

चं०
॥२॥

शा.
॥२॥

ॐ नमश्चण्डिकायै ॥ मार्कण्डेय उवाच ॥ १ ॥ सावर्णिस्सूर्य्यतनयो यो मनुः कथ्यतेऽष्टमः ॥ निशामय तदुत्पत्तिम् विस्तराद्गदतो मम ॥ २ ॥ महामायानुभावेन यथा मन्वंतराधिपः ॥ स बभूव महाभागस्सावर्णिस्तनयो रवेः ॥ ३ ॥ स्वारोचिषेंतरे-पूर्वं चैत्रवंशसमुद्भवः ॥ सुरथो नाम राजाऽभूत्समस्ते क्षितिमंडले ॥ ४ ॥ तस्य पालयतः सम्यक्प्रजाः पुत्रानिवौरसान् ॥ बभूवुश्शत्रवो भूपाः कोलाविध्वंसिनस्तदा ॥ ५ ॥ तस्य तैरभवद्युद्धमतिप्रबलदंडिनः ॥ न्यूनैरपि स तैर्युद्धे कोलाविध्वंसिभिर्जितः ॥ ६ ॥

स. ततः स्वपुरमायातो निजदेशाधिपो ऽभवत् ॥ आक्रांतस्स महाभा- अ.
गस्तैस्तदा प्रबलारिभिः ॥ ७ ॥ अमात्यैर्बलिभिर्दुष्टैर्दुर्बलस्य दुरा-
१ त्मभिः ॥ कोषो बलं चापहृतं तत्रापि स्वपुरे ततः ॥ ततो मृगयाव्यां- १
जेन हृतस्वाम्यस्स भूपतिः ॥ एकाकी हयमारुह्य जगाम गहनम् व-
नम् ॥ ९ ॥ स तत्राश्रममद्राक्षीद् द्विजवर्यस्य मेधसः ॥ प्रशांतश्वाप-
दाकीर्णम् मुनिशिष्योपशोभितम् ॥ १० ॥ तस्थौ किंचित्सकालं च मु-
निना तेन सत्कृतः ॥ इतश्चेतश्च विचरंस्तस्मिन्मुनिवराश्रमे ॥ ११ ॥
सो ऽचिंतयत्तदा तत्र ममत्वाकृष्टचेतनः ॥ मत्पूर्वैःपालितम् पूर्वम् १

मया हीनम् पुरं हि तत् ॥१२॥ मद्भृत्यैस्तैरसद्वृत्तैर्धर्मतः पाल्यते न वा ॥
न जाने स प्रधानो मे शूरहस्ती सदामदः ॥ १३ ॥ मम वैरिवशं यातः
कान्भोगानुपलप्स्यते ॥ ये ममानुगता नित्यम् प्रसादधनभोजनैः
॥१४॥ अनुवृत्तिं ध्रुवं तेऽद्य कुर्वन्त्यन्यमहीभृताम् ॥ असम्यग्व्ययशी-
लैस्तैः कुर्वद्भिः सततम् व्ययम् ॥ १५ ॥ संचितः सोऽतिदुःखे-
न क्षयं कोषो गमिष्यति ॥ एतच्चान्यच्च सततं चिंतयामास पार्थिवः
॥ १६ ॥ तत्र विप्राश्रमाभ्यासे वैश्यमेकं ददर्श सः ॥ स पृष्टस्तेन क-
स्त्वम् भो हेतुश्चागमने ऽत्र कः ॥ १७ ॥ सशोक इव कस्मात् त्वं दुर्मना

इव लक्ष्यसे ॥ इत्याकर्ण्य वचस्तस्य भूपतेः प्रणयोदितम् ॥ १८ ॥
प्रत्युवाच स तम् वैश्यः प्रश्रयावनतो नृपम् ॥ १९ ॥ वैश्य उवाच ॥
॥ २० ॥ समाधिर्नाम वैश्योऽहमुत्पन्नो धनिनां कुले ॥ २१ ॥ पुत्रदा-
रैर्निरस्तश्च धनलोभादसाधुभिः ॥ विहीनश्च धनैर्दारैः पुत्रैरादा-
य मे धनम् ॥ २२ ॥ वनमभ्यागतो दुःखी निरस्तश्चाप्तबंधुभिः ॥
सोऽहं न वेद्मि पुत्राणां कुशलाकुशलात्मिकाम् ॥ २३ ॥ प्रवृत्तिं
स्वजनानां च दाराणां चात्र संस्थितः ॥ किं नु तेषां गृहे क्षेममक्षेमं
किं नु साम्प्रतम् ॥ २४ ॥ कथं ते किं नु सद्वृत्ता दुर्वृत्ताः किं नु मे सुताः

॥२५॥ राजोवाच ॥ २६ ॥ यैर्निरस्तो भवाल्लुँब्धैः पुत्रदारादिभिर्धनैः
॥ २७ ॥ तेषु किम् भवतः स्नेहमनुबध्नाति मानसम् ॥ २८ ॥ वैश्य
उवाच ॥ २९ ॥ एवमेतद्यथा प्राह भवानस्मद्गतम् वचः ॥ ३० ॥
किं करोमि न बध्नाति मम निष्ठुरताम् मनः ॥ यैः संत्यज्य पितृस्नेह
धनलुब्धैर्निराकृतः ॥ ३१ ॥ पतिस्वजनहार्दं च हार्दि तेष्वेव मे मनः ।
किमेतन्नाभिजानामि जानन्नपि महामते ॥ ३२ ॥ यत्प्रेमप्रव-
णं चित्तम् विगुणेष्वपि बंधुषु ॥ तेषां कृते मे निःश्वासा दौर्मनस्यं च
जायते ॥ ३३ ॥ करोमि किं यन्नमनस्तेंष्वप्रीतिषु निष्ठरम् ॥ ३४ ॥

मार्कंडेय उवाच ॥ ३५ ॥ ततस्तौ सहितौ विप्र तम् मुनिं
समुपस्थितौ ॥ ३६ ॥ समाधिर्नाम वैश्यो ऽसौ स च पार्थिवसत्तमः ।
कृत्वा तु तौ यथान्यायं यथार्हं तेन संविदम् ॥ ३७ ॥ उपविष्टौ कथाः
काश्चिच्चक्रतुर्वैश्यपार्थिवौ ॥ ३८ ॥ राजोवाच ॥ ३९ ॥ भगवं-
स्त्वामहम् प्रष्टुमिच्छाम्येकम् वदस्व तत् ॥ ४० ॥ दुःखाय यन्मे मन-
सः स्वचित्तायत्तताम् विना ॥ ममत्वं मम राज्यस्य राज्यांगेष्वखिले-
ष्वपि ॥ ४१ ॥ जानतो ऽपि यथा ऽज्ञस्य किमेतन्मुनिसत्तम ॥ अयं
च निकृतः पुत्रैर्दारैर्भृत्यैस्तथोज्झितः ॥ ४२ ॥ स्वजनेन च संत्य-

कस्तेषु हार्दी तथाऽप्याति ॥ एवमेष तथाऽहं च द्वावप्यत्यंतदुःखितौ ॥ ४३ ॥ दृष्टदोषेऽपि विषये ममत्वाकृष्टमानसौ ॥ तत्केनैतन्महाभाग यन्मोहो ज्ञानिनोरपि ॥ ४४ ॥ ममास्य च भवत्येषा विवेकांधस्य मूढता ॥ ४५ ॥ ऋषिरुवाच ॥ ४६ ॥ ज्ञानमस्ति समस्तस्य जंतोर्विषयगोचरे ॥ ४७ ॥ विषयश्च महाभाग जातिश्चैवम् पृथक् पृथक् ॥ दिवांधाः प्राणिनः केचिद्रात्रावंधास्तथाऽपरे ॥ ४८ ॥ केचिद्दिवा तथा रात्रौ प्राणिनस्तुल्यदृष्टयः ॥ ज्ञानिनो मनुजास्सत्यं किं तु ते नहि केवलम् ॥ ४९ ॥ यतो हि ज्ञानिस्सर्वे पशुपक्षि-

मृगादयः ॥ ज्ञानञ्च तन्मनुष्याणां यत्तेषाम् मृगपक्षिणाम् ॥ ५० ॥
मनुष्याणां च यत्तेषां तुल्यमन्यत्तथोभयोः ॥ ज्ञाने ऽपि साति
पश्यैतान्पतंगाञ्छावचंचुषु ॥ ५१ ॥ कणमोक्षादृतान्मोहा-
त्पीड्यमानानपि क्षुधा ॥ मानुषा मनुजव्याघ्र साभिलषाःसु-
तान्प्रति ॥५२॥ लोभात्प्रत्युपकाराय नन्वेते किन्न पश्यसि ॥ तथा
ऽपि ममतावर्त्ते मोहगर्त्ते निपातिताः ॥ ५३ ॥ महामायाप्रभावेण सं
सारस्थितिकारिणः ॥ तन्नात्र विस्मयः कार्यो योगनिद्रा जगत्पतेः
॥५४॥ महामाया हरेश्चैषा तया संमोह्यते जगत् ॥ ज्ञानिनामपि चे-

तांसि देवी भगवती हि सा ॥ ५५ ॥ बलादाकृष्य मोहाय महामाया प्रयच्छति ॥ तया विसृज्यते विश्वं जगदेतच्चराचरम् ॥ ५६ ॥ सैषा प्रसन्ना वरदा नृणाम् भवति मुक्तये ॥ सा विद्या परमामुक्तेर्हेतुभूता सनातनी ॥ ५७ ॥ संसारबंधहेतुश्च सैव सर्वेश्वरेश्वरी ॥ ५८ ॥ राजोवाच ॥५९॥ भगवन्का हि सा देवी महामायेति याम् भवान् ॥ ६० ॥ ब्रवीति कथमुत्पन्ना सा कर्म्मास्याश्च किं द्विज ॥ यत्स्वभावा च सा देवी यत्स्वरूपा यदुद्भवा ॥ ६१ ॥ तत्सर्वं श्रोतुमिच्छामि त्वत्तो ब्रह्मविदाम् वर ॥ ६२ ॥ ऋषिरुवाच ॥ ६३ ॥ नित्यैव सा जगन्मूर्त्ति-

स्तया सर्वमिदं ततम् ॥ ६४ ॥ तथा ऽपि तत्समुत्पत्तिर्बहुधा श्रूयताम्
मम ॥ देवानां कार्यसिद्ध्यर्थमाविर्भवति सा यदा ॥ ६५ ॥ उत्पन्ने-
ति तदा लोके सा नित्या ऽप्यभिधीयते ॥ योगनिद्रां यदा विष्णुर्जग-
त्येकार्णवीकृते ॥ ६६ ॥ आस्तीर्य शेषमभजत्कल्पांते भगवान्प्रभुः ॥
तदा द्वावसूरौ घोरौ विख्यातौ मधुकैटभौ ॥ ६७ ॥ विष्णुकर्णम-
लोद्भूतौ हंतुम् ब्रह्माणमुद्यतौ ॥ स नाभिकमले विष्णोः स्थितो ब्रह्मा
प्रजापतिः ॥ ६८ ॥ दृष्ट्वा तावसुरौ चोग्रौ प्रसुप्तं च जनार्दनम् ॥ तुष्टाव
योगनिद्रां तामेकाग्रहृदयस्थितः ॥ ६९ ॥ विबोधनार्थाय हरेर्हरिनेत्र-

कृतालयाम् ।७०। ब्रह्मोवाच ॥७१॥ विश्वेश्वरीं जगद्धात्रीं स्थितिसं-
हारकारिणीम् ॥ स्तौमि निद्राम् भगवतीम् विष्णोरतुलतेजसः ॥७२
त्वं स्वाहा त्वं स्वधा त्वं हि वषट्कारस्वरात्मिका। ७३। सुधा त्वमक्ष-
रे नित्ये त्रिधामात्रात्मिका स्थिता॥ अर्धमात्रा स्थिता नित्या या-
ऽनुच्चार्या विशेषतः ॥७४॥ त्वमेव सा त्वं सावित्री त्वं देवि जननी
परा॥ त्वयैतद्धार्यते विश्वं त्वयैतत्सृज्यते जगत् ॥ ७५॥ त्वयैतत्पा-
ल्यते देवि त्वमत्स्यंते च सर्वदा ॥ विसृष्टौ सृष्टिरूपा त्वं स्थितिरू-
पा च पालने ॥७६ ॥ तथा संहृतिरूपांते जगतो ऽस्य जगन्मये ॥

महाविद्या महामाया महामेधा महास्मृतिः ॥ ७७ ॥ महामोहा
च भवती महादेवी महासुरी ॥ प्रकृतिस्त्वं च सर्वस्य गुणत्रयवि-
भाविनी ॥ ७८ ॥ कालरात्रिर्महारात्रिर्मोहरात्रिश्च दारुणा ॥
त्वं श्रीस्त्वमीश्वरी त्वं ह्रीस्त्वम् बुद्धिर्बोधलक्षणा ॥७९॥ लज्जापुष्टि-
स्तथातुष्टिस्त्वंशांति.क्षांतिरेव च ॥ खड्गिनी शूलिनी घोरा गदि-
नी चक्रिणी तथा ॥ ८० ॥ शंखिनी चापिनी वाणा भुशुंडी परिघा-
युधा ॥ सौम्या सौम्यतरा ऽशेषसौम्येभ्यस्त्वतिसुन्दरी ॥ ८१ ॥
परा पराणाम् परमा त्वमेव परमेश्वरी ॥ यच्च किंचित्कचिद्वस्तु सद

सद्वा खिलात्मिके ॥ ८२ ॥ तस्य सर्वस्य या शक्तिस्सा त्वं किं स्तूयसे तदा ॥ यया त्वया जगत्स्रष्टा जगत्पात्ति यो जगत् ॥ ॥ ८३ ॥ सो ऽपि निद्रावशं नीतः कस्त्वां स्तोतुमिहेश्वरः ॥ विष्णुश्शरीरग्रहणमहमीशान एव च ॥ ८४ ॥ कारितास्ते यतो ऽतस्त्वां कः स्तोतुं शक्तिमान्भवेत् ॥ सा त्वमित्थम् प्रभावैस्स्वैरुदारैर्देवि संस्तुता ॥ ८५ ॥ मोहयैतौ दुराधर्षावसुरौ मधुकैटभौ ॥ प्रबोधं च जगत्स्वामी नीयतामच्युतो लघु ॥ ८६ ॥ बोधश्च क्रियतामस्य हन्तुमेतौ महासुरौ ॥ ८७ ॥

ऋषिरुवाच ॥ ८८ ॥ एवं स्तुता तदा देवी तामसी तत्र वे-
धसा ॥ ८९ ॥ विष्णोः प्रबोधनार्थाय निहन्तुम् मधुकैटभौ ॥ ने-
त्रास्यनासिकाबाहुहृदयेभ्यस्तथोरसः ॥ ९० ॥ निर्गम्य दर्श-
ने तस्थौ ब्रह्मणो ऽव्यक्तजन्मनः ॥ उत्तस्थौ च जगन्नाथस्तया
मुक्तो जनार्दनः ॥ ९१ ॥ एकार्णवे हि शयनात्ततः स ददृशे च
तौ ॥ मधुकैटभौ दुरात्मानावतिवीर्यपराक्रमौ ॥ ९२ ॥ क्रोध-
रक्तेक्षणावत्तुम् ब्रह्माणं जनितोद्यमौ ॥ समुत्थाय ततस्ताभ्यां
युयुधे भगवान्हरिः ॥ ९३ ॥ पंचवर्षसहस्राणि बाहुप्रहरणो वि-

भुः ॥ तावप्यतिबलान्मत्तौ महामायाविमोहितौ ॥ ९४ ॥ उ-
क्तवंतौ वरोऽस्मत्तो व्रियतामिति केशवम् ॥ ९५ ॥ श्रीभगवानुवा-
च ॥ ९६ ॥ भवेतामद्य मे तुष्टौ मम वध्यावुभावपि॥ ९७ ॥ कि-
मन्येन वरेणात्र एतावद्धि वृतम्मया ॥ ९८ ॥ ऋषिरुवाच ॥ ९९ ॥
वंचिताभ्यामिति तदा सर्वमापोमयं जगत् ॥ १०० ॥ विलोक्य
ताभ्यां गदितो भगवान्कमलेक्षणः ॥ प्रीतौस्वस्तव युद्धेन श्ला-
घ्यस्त्वन्मृत्युरावयोः ॥ आवां जहि न यत्रोर्वी सलिलेन परिप्लुता
॥१०१॥ ऋषिरुवाच ॥१०२॥ तथेत्युक्त्वा भगवता शंखचक्रगदा-

भृता ॥ कृत्वा चक्रेण वैछिन्ने जघने शिरसी तयोः ॥१०३॥ एवमे
षा समुत्पन्ना ब्रह्मणा संस्तुता स्वयम् ॥ प्रभावमस्या देव्या स्तु भूयः
शृणु वदामि ते ॥ १०४ ॥

इति श्रीमार्कण्डेयपुराणे सावर्णिके
मन्वंतरे देवी माहात्म्ये
मधु कैटभ वधः ॥ १ ॥

ऋषिरुवाच ॥ १ ॥ देवासुरमभूद्युद्धम् पूर्णमब्दशतम् पुरा ॥ महिषेऽसुराणामाधिपे देवानां च पुरंदरे ॥ २ ॥ तत्रासुरैर्महावीर्यैर्देवसैन्यम् पराजितम् ॥ जित्वा च सकलान्देवानिंद्रोऽभून्माहिषासुरः ॥ ३ ॥ ततः पराजिता देवाः पद्मयोनिम् प्रजापतिम् ॥ पुरस्कृत्य गतास्तत्र यत्रेशगरुडध्वजौ ॥ ४ ॥ यथावृत्तं तयोस्तद्वन्महिषासुरचेष्टितम् ॥ त्रिदशाः कथयामासुर्देवाभिभवविस्तरम् ॥ ५ ॥ सूर्येंद्राग्न्यनिलेंदूनां यमस्य वरुणस्य च ॥ अन्येषां चाधिकाशान्स स्वयमेवाधितिष्ठति ॥ ६ ॥ स्वर्गान्निराकृताः सर्वे तेन देवगणा भुवि ॥ विचरंति यथा म

त्यौ महिषेण दुरात्मना ॥ ७ ॥ एतद्वः कथितं सर्वममरारिविचे-
ष्टितम् ॥ शरणं च प्रपन्नाः स्मो वधस्तस्य विचिंत्यताम् ॥ ८ ॥ इ-
त्थं निशम्य देवानाम् वचांसि मधुसूदनः ॥ चकार कोपं शम्भुश्च
भ्रुकुटीकुटिलाननौ ॥ ९ ॥ ततो ऽतिकोपपूर्णस्य चक्रिणो वदना-
त्ततः ॥ निश्चक्राम महत्तेजो ब्रह्मणश्शंकरस्य च ॥ १० ॥
अन्येषां चैव देवानां शक्रादीनां शरीरतः ॥ निर्गतं सुमहत्तेजस्त-
च्चैक्यं समगच्छत ॥ ११ ॥ अतीवतेजसः कूटं ज्वलतमिव प-
र्वतम् ॥ ददृशुस्ते सुरास्तत्र ज्वालाव्याप्तदिगंतरम् ॥ १२ ॥ अतु-

लं तत्र तत्तेजः सर्वदेव शरीरजम् ॥ एकस्थं तदभून्नारी व्याप्त
लोकत्रयं त्विषा ॥ १३ ॥ यदभूच्छाम्भवं तेजस्तेनाजयत तन्मुखम्
॥ याम्येन चाभवन्केशा बाहवो विष्णुतेजसा ॥ १४ ॥ सौम्येन
स्तनयोर्युग्मम् मध्यं चैंद्रेण चाभवत् ॥ वारुणेन च जंघोरू नित-
म्बस्तेजसा भुवः ॥ १५ ॥ ब्रह्मणस्तेजसा पादौ तदंगुल्यो ऽर्कते-
जसा ॥ वसूनां च करांगुल्यःकौबेरेण च नासिका ॥ १६ ॥ तस्या-
स्तु दन्तास्सम्भूताः प्राजापत्येन तेजसा ॥ नयनत्रितयं जज्ञे तथा
पावकतेजसा ॥ १७ ॥ भ्रुवौ च सन्ध्ययोस्तेजः श्रवणावनिलस्य च ॥

अन्येषां चैव देवानां सम्भवस्तेजसां शिवा ॥ १८ ॥ ततस्सम-
स्त देवानां तेजोराशिसमुद्भवाम् ॥ ताम् विलोक्य मुदम् प्रापुरम-
रामहिषार्दिता: ॥ १९ ॥ शूलं शूलाद्विनिष्कृष्य ददौ तस्यै पिनाकधृ-
क् ॥ चक्रं च दत्तवान् कृष्णस्समुत्पाट्य स्वचक्रत: ॥ २० ॥ शंखं
च वरुणश्शक्तिं ददौ तस्य हुताशन: ॥ मारुतो दत्तवांश्चापम् बाणपू-
र्णे तथेषुधी ॥ २१ ॥ वज्रमिंद्रस्समुत्पाट्य कुलिशादमराधिप: ॥
ददौ तस्यै सहस्राक्षो घण्टामैरावताद्गजात् ॥ २२ ॥ कालदण्डा-
द्यमो दण्डम् पाशं चाम्बुपतिर्ददौ ॥ प्रजापतिश्चाक्षमालां ददौ

ब्रह्मा कमण्डलुम् ॥ २३ ॥ समस्तरोमकूपेषु निजरश्मीन्दिवाक-
रः ॥ कालश्च दत्तवान्खड्गं तस्यै चर्म च निर्मलम् ॥ २४ ॥
क्षीरोदश्चामलं हारमजरे च तथाम्बरे ॥ चूडामणिं तथा दिव्यं कु-
ण्डले कटकानि च ॥ २५ ॥ अर्धचन्द्रं तथा शुभ्रं केयूरान्सर्वबाहु-
षु ॥ नूपुरौ विमलौ तद्वद् ग्रैवेयकमनुत्तमम् ॥ २६ ॥ अंगुलीय-
करत्नानि समस्तास्वंगुलीषु च ॥ विश्वकर्मा ददौ तस्यै परशुं चाति-
निर्मलम् ॥ २७ ॥ अस्त्राण्यनेकरूपाणि तथाऽभेद्यं च दंशनम् ॥ अ-
म्लानपंकजाम् मालां शिरस्युरसि चापराम् ॥ २८ ॥ अददज्जलधि-

स. स्तस्यै पंकजं चातिशोभनम् ॥ हिमवान्वाहनं सिंहं रत्नानि विविधा अ.
नि च ॥ २९ ॥ ददावशून्यं सुरया पानपात्रं धनाधिपः ॥
११ शेषश्च सर्वनागेशो महामणिविभूषितम् ॥ ३० ॥ नाग- २.
हारं ददौ तस्यै धत्ते यः पृथिवीमिमाम् ॥ अन्यैरपि सुरै
र्देवी भूषणैरायुधैस्तथा ॥ ३१ ॥ सम्मानिता ननादोच्चैस्साट्ट-
हासम् मुहुर्मुहुः ॥ तस्या नादेन घोरेण कृत्स्नमापूरितं नभः ॥
॥ ३२ ॥ अमायता ऽतिमहता प्रतिशब्दो महानभूत् ॥ चुक्षुभु-
स्सकला लोकास्समुद्राश्च चकम्पिरे ॥ ३३ ॥ चचाल वसुधा चेलुः ११.

सकलाश्च महीधराः ॥ जयेति देवाश्च मुदा तामूचुः सिंहवाहि-
नीम् ॥ ३४ ॥ तुष्टुवुर्मुनयश्चैनाम् भक्तिनम्रात्ममूर्तयः ॥ दृ-
ष्ट्वा समस्तं संक्षुब्धं त्रैलोक्यममरारयः ॥ ३५ ॥ सन्नद्धाखिल-
सैन्यास्ते समुत्तस्थुरुदायुधाः ॥ आः किमेतदिति क्रोधादाभाष्य म-
हिषासुरः ॥ ३६ ॥ अभ्यधावत तं शब्दमशेषैरसुरैर्वृतः ॥ स ददर्श
ततो देवीम् व्याप्तलोकत्रयां त्विषा ॥ ३७ ॥ पादाक्रान्त्या नतभुवं
किरीटोल्लिखिताम्बराम् ॥ क्षोभिताशेषपातालां धनुर्ज्यानिःस्वने
न ताम् ॥ ३८ ॥ दिशो भुजसहस्रेण समंताद्व्याप्य संस्थिताम् ॥

स. ततःप्रववृते युद्धं तया देव्या सुरद्विषाम् ॥ ३९॥ शस्त्रास्त्रैर्बहुधामु अ.
क्तैरादीपितदिगंतरम् ॥ महिषासुरसेनानीश्चिक्षुराख्यो महासुरः
१२. ॥ ४० ॥ युयुधे चामरश्चान्यैश्चतुरंगबलान्वितः ॥ रथा- २.
नामयुतैः षड्भिरुदग्राख्यो महासुरः ॥ ४१ ॥ अयु-
ध्यतायुतानां च सहस्रेण महाहनुः ॥ पञ्चाशद्भिश्चनियुतैरसिलो-
मा महासुरः ॥ ४२ ॥ अयुतानां शतैः षड्भिर्बाष्कलो युयुधे रणे ॥
गजवाजिसहस्रौघैरनेकैः परिवारितः ॥ ४३ ॥ वृतो रथानां को-
ट्या च युद्धे तस्मिन्नयुध्यत॥ बिडालाख्योऽयुतानां च पञ्चाशद्भिर १२

थायुतैः ॥ ४४ ॥ युयुधे संयुगे तत्र रथानाम् परिवारितः ॥ अन्ये
च तत्रायुतशो रथनागहयैर्वृताः ॥ ४५ ॥ युयुधुस्संयुगे देव्या सह त-
त्र महासुराः ॥ कोटिकोटिसहस्रैस्तु रथानां दंतिनां तथा ॥ ४६ ॥
हयानां च वृतो युद्धे तत्राभून्महिषासुरः ॥ तोमरैर्भिंदिपालैश्च श-
क्तिभिर्मुसलैस्तथा ॥ ४७ ॥ युयुधुस्संयुगे देव्या खड्गैःपरशुपट्टि-
शैः ॥ केचिच्च चिक्षिपुश्शक्तीः केचित्पाशां स्तथा ऽपरे ॥ ४८ ॥ दे-
वीं खड्गप्रहारैस्तु ते तां हन्तुम् प्रचक्रमुः ॥ सा ऽपि देवी ततस्तानि
शस्त्राण्यस्त्राणि चण्डिका ॥ ४९ ॥ लीलयैव प्रचिच्छेद निजश-

स्त्रास्त्रवर्षिणी ॥ अनायस्तानना देवी स्तूयमाना सुरर्षिभिः ॥
॥ ५० ॥ मुमोचासुरदेहेषु शस्त्राण्यस्त्राणि चेश्वरी ॥ सो ऽपि क्रुद्धो
धुतसटो देव्या वाहनकेसरी ॥ ५१ ॥ चचारासुरसैन्येषु वनेष्वि-
व हुताशनः ॥ निःश्वासान्मुमुचे यांश्च युध्यमाना रणे ऽम्बिका ॥
॥ ५२ ॥ त एव सद्यः संभूता गणाश्शतसहस्रशः ॥ युयुधुस्ते परशु-
भिर्भिंदिपालासिपट्टिशैः ॥ ५३ ॥ नाशयंतो ऽसुरगणान् देवीश-
क्त्युपबृंहिताः ॥ अवादयंत पटहान् गणाश्शंखांस्तथा परे ॥
॥ ५४ ॥ मृदंगांश्च तथैवान्ये तस्मिन्युद्धमहोत्सवे ॥ ततो देवी

त्रिशूलेन गदया शक्तिवृष्टिभिः ॥ ५५ ॥ खड्गादिभिश्च शतशो निजघान महासुरान् ॥ पातयत्मास चैवान्यान्घंटास्वनविमोहितान् ॥ ५६ ॥ असुरान् भुवि पाशेन बद्ध्वा चान्यानकर्षयत् ॥ केचिद् द्विधाकृतास्तीक्ष्णैः खड्गपातैस्तथा ऽपरे ॥ ५७ ॥ विपोथिता निपातेन गदया भुवि शेरते ॥ वेमुश्च केचिद्रुधिरम् मुसलेन भृशं हताः ॥ ५८ ॥ केचिन्निपतिता भूमौ भिन्नाः शूलेन वक्षसि ॥ निरंतराश्शरौघेण कृताः केचिद्रणाजिरे ॥ ५९ ॥ श्येनानुकारिणः प्राणान्मुमुचुस्त्रिदशार्दनाः ॥ केषांचिद्बाहव-

श्छिन्नाश्छिन्नग्रीवास्तथा ऽपरे ॥ ६० ॥ शिरांसि पेतुरन्येषा-
मन्ये मध्ये विदारितः ॥ विच्छिन्नजंघास्त्वपरे पेतु रुर्व्याम् महासु-
राः ॥ ६१ ॥ एकबाह्वक्षिचरणाः केचिद्देव्या द्विधाकृताः ॥
छिन्ने ऽपि चान्ये शिरसि पतिताः पुनरुत्थिताः ॥ ६२ ॥ कबंधा
युयुधुर्देव्या गृहीतपरमायुधाः ॥ ननृतुश्चापरे तत्र युद्धे तूर्यल-
याश्रिताः ॥ ६३ ॥ कबंधाश्छिन्नशिरसः खड्गशक्त्यृष्टिपाणयः ॥
तिष्ठ तिष्ठेति भाषंतो देवीमन्ये महासुराः ॥ ६४ ॥ पातितै
रथनागाश्वैरसुरैश्च वसुंधरा ॥ अगम्या सा ऽभवत्तत्र यत्राभूत्स

महारणः ॥ ६५ ॥ शोणितौघा महानद्यस्सद्यस्तत्र विसुस्रुवुः ॥ मध्ये चासुरसैन्यस्य वारणासुरवाजिनाम् ॥ ६६ ॥ क्षणेन तन्महासैन्यमसुराणां तथाऽम्बिका ॥ निन्ये क्षयं यथा वन्हिस्तृणदारुमहाचयम् ॥ ६७ ॥ स च सिंहो महानादमुत्सृजन्धुतकेसरः ॥ शरीरेभ्योऽमरारीणामसूनिव विचिन्वति ॥ ६८ ॥ देव्या गणैश्च तैस्तत्र कृतं युद्धं तथाऽसुरैः ॥ यथैषां तुष्टुवुर्देवाः पुष्पवृष्टिमुचो दिवि ॥ ६९ ॥ ॥✿॥ ॥✿॥ ॥✿॥

इति श्रीमार्कण्डेयपुराणे सावर्णिके
मन्वंतरे देवीमाहात्म्ये महिषा-
सुरसैन्यवधः ॥ २ ॥

॥ ऋषिरुवाच ॥ १ ॥ निहन्यमानं तत्सैन्यमवलोक्य महासुरः ॥ सेनानीश्चिक्षुरः कोपाद्ययौ योद्धुमथाम्बिकाम् ॥ २ ॥ स देवीं शरवर्षेण ववर्ष समरेऽसुरः ॥ यथा मेरुगिरेः शृंगं तोयवर्षेण तोयदः ॥ ३ ॥ तस्य च्छित्वा ततो देवी लीलयैव शरोत्करान् ॥ जघान तुरगान्बाणैर्यन्तारं चैव वाजिनाम् ॥ ४ ॥ चिच्छेद च धनुः सद्यो ध्वजं चातिसमुच्छ्रितम् ॥ विव्याध चैव गात्रेषु च्छिन्नधन्वानमाशुगैः ॥ ५ ॥ स च्छिन्नधन्वा विरथो हताश्वो हतसारथिः ॥ अभ्यधावत तां देवीं खड्गचर्मधरोऽसुरः ॥ ६ ॥

सिंहमाहत्य खड्गेन तीक्ष्णधारेण मूर्धनि ॥ आजघान भुजे सव्ये
देवीमप्यतिवेगवान् ॥ ७ ॥ तस्याः खड्गो भुजम् प्राप्य पफाल
नृपनन्दन ॥ ततो जग्राह शूलं स कोपादरुणलोचनः ॥ ८ ॥
चिक्षेप च ततस्तत्तु भद्रकाल्याम् महासुरः ॥ जाज्वल्यमानं ते
जोभीरविबिम्बमिवाम्बरात् ॥ ९ ॥ दृष्ट्वा तदापतच्छूलं देवी
शूलममुंचत ॥ तच्छूलं शतधा तेन नीतं स च महासुरः ॥१०॥
हते तस्मिन्महावीर्ये महिषस्य चमूपतौ । आजगाम गजारूढ-
श्चामरस्त्रिदशार्दनः ॥ ११ ॥ सो ऽपि शक्तिम् मुमोचाथ देव्यास्ता-

मम्बिका द्रुतम् ॥ हुंकाराभिहताम् भूमौ पातयामास निष्प्रभाम् ॥ १२ ॥ भग्नां शक्तिं निपतितां दृष्ट्वा क्रोधसमन्वितः ॥ चिक्षेप चामरः शूलम् बाणैस्तदपि सा ऽच्छिनत् ॥ १३ ॥ ततः सिंहस्समुत्पत्य गजकुम्भांतरस्थितः ॥ बाहुयुद्धेन युयुधे तेनोच्चैस्त्रिदशारिणा ॥ १४ ॥ युध्यमानौ ततस्तौ तु तस्मान्नागान्महीं गतौ ॥ युयुधाते ऽतिसंरब्धौ प्रहारैरतिदारुणैः ॥ १५ ॥ ततो वेगात्खमुत्पत्य निपत्य च मृगारिणा ॥ करप्रहारेण शिरश्चामरस्य पृथक्कृतम् ॥ १६ ॥ उदग्रश्च रणे देव्या शिलावृक्षादि

भिर्हतः ॥ दन्तमुष्टितलैश्चैव करालश्च निपातितः ॥ १७ ॥
देवी क्रुद्धा गदापातैश्चूर्णयामास चोद्धतम् ॥ बाष्कलम् भिंदिपा-
लेन बाणैस्ताम्रं तथाऽन्धकम् ॥ १८ ॥ उग्रास्यमुग्रवीर्यं च
तथैव च महाहनुम् । त्रिनेत्रा च त्रिशूलेन जघान परमेश्वरी ॥
१९ ॥ विडालस्यासिना कायात्पातयामास वै शिरः ॥ दुर्द्धरं
दुर्मुखं चोभौ शरैर्निन्ये यमक्षयम् ॥ २० ॥ एवं संक्षीयमाणे तु
स्वसैन्ये महिषासुरः ॥ माहिषेण स्वरूपेण त्रासयामास तान्
गणान् ॥ २१ ॥ कांश्चित्तुंडप्रहारेण खुरक्षेपैस्तथाऽपरान् । लांगू-

लताडितांश्चान्याञ्छृंगाभ्यां च विदारितान् ॥ २२ ॥ वेगेन कांश्चिदपरान्नादेन भ्रमणेन च ॥ निःश्वासपवनेनान्यान्पातयामास भूतले ॥ २३ ॥ निपात्य प्रमथानीकमभ्यधावत सोऽसुरः ॥ सिंहं हन्तुम् महादेव्याः कोपं चक्रे ततोऽम्बिका ॥ २४ ॥ सोऽपि कोपान्महावीर्यः खुरक्षुण्णमहीतलः ॥ शृंगाभ्याम् पर्वतानुच्चांश्चिक्षेप च ननर्द च ॥ २५ ॥ वेगभ्रमणविक्षुण्णा मही तस्य व्यशीर्यत ॥ लांगूलेनाहतश्चाब्धिः प्लावयामास सर्वतः ॥ ॥ २६ ॥ धुतशृंगविभिन्नाश्च खण्डखण्डं ययुर्घनाः ॥ श्वासानि-

लास्ताः शतशो निपेतुर्नभसो ऽचलाः ॥ २७ ॥ इति क्रोधसमा-
ध्मातमापतंतम् महासुरम् ॥ दृष्ट्वा सा चण्डिका कोपं तद्वधाय
तदा ऽकरोत् ॥ २८ ॥ सा क्षिप्त्वा तस्य वै पाशं तम् बबंध महा-
सुरम् ॥ तत्याज माहिषं रूपं सो ऽपि बद्धो महामृधे ॥ २९ ॥
ततः सिंहो ऽभवत्सद्यो यावत्तस्याम्बिका शिरः ॥ छिनत्ति ताव-
त्पुरुषः खड्गपाणिरदृश्यत ॥ ३० ॥ तत एवाशु पुरुषं देवी चि-
च्छेद सायकैः ॥ तं खड्गचर्मणा सार्धं ततः सो ऽभून्महागजः
॥ ३१ ॥ करेण च महासिंहं तं चकर्ष जगर्ज च ॥ कर्षतस्तु करं

देवी खड्गेन निरकृंतत ॥ ३२ ॥ ततो महासुरो भूयो माहिषम्
वपुरास्थितः ॥ तथैव क्षोभयामास त्रैलोक्यं सचराचरम् ॥ ३३ ॥
ततः क्रुद्धा जगन्माता चण्डिका पानमुत्तमम् ॥ पपौ पुनः पुनश्चैव
जहासारुणलोचना ॥ ३४ ॥ ननर्द चासुरः सोऽपि बलवीर्यम-
दोद्धतः ॥ विषाणाभ्यां च चिक्षेप चण्डिकाम्प्रति भूधरान् ॥
॥ ३५ ॥ सा च तान्प्रहितांस्तेन चूर्णयन्ती शरोत्करैः ॥ उवाच तम्
मदोद्धूतम् मुखरागाकुलाक्षरम् ॥ ३६ ॥ देव्युवाच ॥ ३७ ॥
गर्ज गर्ज क्षणम् मूढ मधु यावत्पिबाम्यहम् ॥ मया त्वयि हते

स. ऽत्रैव गर्जिष्यंत्याशु देवताः ॥ ३८ ॥ ऋषिरुवाच ॥ ३९ ॥ एवमु- अ.
क्त्वा समुत्पत्य सा रूढा तम् महासुरम् । पादेनाक्रम्य कण्ठे च
१९. शूलेनैनमताडयत् ॥ ४० ॥ ततः सो ऽपि पदाक्रांतस्तया निज- ३.
मुखात्ततः ॥ अर्धनिष्क्रांत एवातिदेव्या वीर्येण संवृतः ॥ ४१ ॥
अर्धनिष्क्रांत एवासौ युद्ध्यमानो महासुरः ॥ तया महासिना
देव्या शिरश्छित्त्वा निपातितः ॥ ४२ ॥ ततो हाहाकृतं सर्वं दै-
त्यसैन्यं ननाश तत् ॥ प्रहर्षं च परं जग्मुः सकला देवतागणाः
॥ ४३ ॥ तुष्टुवुस्तां सुरा देवीं सह दिव्यैर्महर्षिभिः ॥ जगुर्गन्ध- १९.

र्वपतयो ननृतुश्चाप्सरोगणाः ॥ ४४ ॥

इति श्रीमार्कण्डेयपुराणे सावर्णिके
मन्वंतरे देवीमाहात्म्ये
महिषासुरवधः ॥ ३ ॥

स. ऋषिरुवाच ॥ १ ॥ शक्रादयःसुरगणा निहते ऽतिवीर्ये तस्मि- अ.
न्दुरात्मनि सुरारिबले च देव्या ॥ तां तुष्टुवुः प्रणतिनम्रशिरो-
२०. धरांसा वाग्भिः प्रहर्षपुलकोद्गमचारुदेहाः ॥ २ ॥ देवा ३.
ऊचुः । देव्या यया ततमिदं जगदात्मशक्त्या निश्शेषदेवगणश-
क्तिसमूहमूर्त्या ॥ तामम्बिकामखिलदेवमहर्षिपूज्याम् भक्त्या
नताःस्म विदधातु शुभानि सा नः ॥ ३ ॥ यस्याः प्रभावमतुल-
म् भगवाननन्तो ब्रह्मा हरश्च न हि वक्तुमलम् बलं च ॥ सा
चण्डिका ऽखिलजगत्परिपालनाय नाशाय चाशुभभयस्य मतिं २०.

करोतु ॥ ४ ॥ या श्रीः स्वयं सुकृतिनाम् भवनेष्वलक्ष्मीः पापा-
त्मनां कृतधियां हृदयेषु बुद्धिः ॥ श्रद्धा सतां कुलजनप्रभवस्य
लज्जा तां त्वां नताःस्म परिपालय देवि विश्वम् ॥ ५ ॥ किम्
वर्णयाम तव रूपमचिंत्यमेतत्किं चातिवीर्यमसुरक्षयकारि भू-
रि ॥ किं चाहवेषु चरितानि तवातियानि सर्वेषु देव्यसुरदेवग-
णादिकेषु ॥ ६ ॥ हेतुः समस्तजगतां त्रिगुणापि दोषैर्न ज्ञायसे
हरिहरादिभिरप्यपारा ॥ सर्वाश्रया ऽखिलमिदं जगदंशभूतम-
व्याकृता हि परमा प्रकृतिस्त्वमाद्या ॥ ७ ॥ यस्यास्समस्तसु-

रतासमुदीरणेन तृप्तिम् प्रयाति सकलेषु मखेषु देवि ॥ स्वाहा
ऽसि वै पितृगणस्य च तृप्तिहेतुरुच्चार्यसे त्वमत एव जनैस्स्व-
धा च ॥ ८ ॥ या मुक्तिहेतुरविचिंत्यमहाव्रता च अभ्यस्यसे सु-
नियतेंद्रियतत्त्वसारैः ॥ मोक्षार्थिभिर्मुनिभिरस्तसमस्तदोषैर्वि-
द्या ऽसि सा भगवती परमा हि देवी ॥ ९ ॥ शब्दात्मिका सुवि-
मलर्ग्यजुषां निधानमुद्गीथरम्यपदपाठवतां च साम्नाम् ॥ देवी त्र
यी भगवती भवभावनाय वार्ता च सर्वजगताम्परमार्तिहंत्री ॥
॥ १० ॥ मेधा ऽसि देवि विदिताखिलशास्त्रसारा दुर्गा ऽसि दुर्ग

भवसागरनौरसंगा ॥ श्रीःकैटभारिहृदयैककृताधिवासा गौरीत्व-
मेव शशिमौलिकृतप्रतिष्ठा ॥ ११ ॥ ईषत्सहासममलम् परि-
पूर्णचन्द्रविम्बानुकारि कनकोत्तमकांति कांतम् ॥ अत्यद्भुतम्-
प्रहितमात्तरुषा तथा ऽपि वक्रम् विलोक्य सहसा महिषासुरेण ॥
॥१२ ॥ दृष्ट्वा तु देवि कुपितम् भ्रुकुटीकरालमुद्यच्छशांकसदृश-
च्छवि यन्न सद्यः ॥ प्राणान्मुमोच महिषस्तदतीवचित्रं कैर्जी-
व्यते हि कुपितांतकदर्शनेन ॥ १३ ॥ देवि प्रसीद परमा भवती
भवाय सद्यो विनाशयसि कोपवती कुलानि ॥ विज्ञातमेतदधु-

नैव यदस्तमेतन्नीतम् बलं सुविपुलम् महिषासुरस्य ॥ १४ ॥ ते
संमता जनपदेषु धनानि तेषां तेषां यशांसि न च सीदति धर्मवर्गः ॥
धन्यास्त एव निभृतात्मजभृत्यदारा येषां सदाऽभ्युदयदा भवती
प्रसन्ना ॥ १५ ॥ धर्म्याणि देवि सकलानि सदैव कर्माण्यत्यादृ-
तः प्रतिदिनं सुकृती करोति । स्वर्गम् प्रयाति च ततो भवती प्र-
सादाल्लोकत्रये ऽपि फलदा ननु देवि तेन ॥ १६ ॥ दुर्गे स्मृ-
ता हरसि भीतिमशेषजंतोः स्वस्थैः स्मृता मतिमतीव शुभां
ददासि ॥ दारिद्र्यदुःखभयहारिणि का त्वदन्या सर्वोपकारकर-

णाय सदार्द्रचित्ता ॥ १७ ॥ एभिर्हतैर्जगदुपैति सुखं तथैते कुर्वंतु नाम नरकाय चिराय पापम् ॥ संग्राममृत्युमधिगम्य दिवम् प्रयांतु मत्वेति नूनमहितान्विनिहंसि देवि ॥ १८ ॥ दृष्ट्वैव किं न भवती प्रकरोति भस्म सर्वासुरानरिषु यत्प्रहिणोषि शस्त्रम् ॥ लोकान्प्रयांतु रिपवो ऽपि हि शस्त्रपूता इत्थम् मतिर्भवति तेष्वहितेषु साध्वी ॥ १९ ॥ खड्गप्रभानिकरविस्फुरणैस्तथोग्रैश्शूलाग्रकांतिनिवहेन दृशो ऽसुराणाम् ॥ यन्नागता विलयमंशुमदिंदुखंडयोग्याननं तव विलोकयतां

तदेतत् ॥ २० ॥ दुर्वृत्तवृत्तशमनं तव देवि शीलं रूपं तथैतदवि-
चिंत्यमतुल्यमन्यैः ॥ वीर्यं च हंतृहृतदेवपराक्रमाणां वैरिष्वपि
प्रकटितैव दया त्वयेत्थम् ॥ २१ ॥ केनोपमा भवतु तेऽस्य पराक्र-
मस्य रूपं च शत्रुभयकार्यतिहारि कुत्र ॥ चित्ते कृपा समरनि-
ष्ठुरता च दृष्टा त्वय्येव देवि वरदे भुवनत्रयेऽपि ॥ २२ ॥ त्रैलो-
क्यमेतदखिलं रिपुनाशनेन त्रातं त्वया समरमूर्धनि तेऽपि हत्वा ॥
नीता दिवं रिपुगणा भयमप्यपास्तमस्माकमुन्मदसुरारिभवं न-
मस्ते ॥ २३ ॥ शूलेन पाहि नो देवि पाहि खड्गेन चाम्बिके ॥

घंटास्वेनन नः पाहि चापज्यानिस्स्वनेन च ॥ २४ ॥ प्राच्यां
रक्ष प्रतीच्यां च चंडिके रक्ष दक्षिणे ॥ भ्रामणेनात्मशूलस्य
उत्तरस्यां तथेश्वरि ॥ २५ ॥ सौम्यानि यानि रूपाणि त्रैलोक्ये
विचरंति ते ॥ यानि चात्यर्थघोराणि तैरक्षास्मांस्तथा भुवम् ॥
॥ २६ ॥ खड्गशूलगदादीनि यानि चास्त्राणि तेऽम्बिके ॥ कर-
पल्लवसंगीनि • तैरस्मान् रक्ष सर्वतः ॥ २७ ॥ ऋषिरुवाच ॥
॥ २८ ॥ एवं स्तुता सुरैर्दिव्यैः कुसुमैर्नंदनोद्भवैः ॥ अर्चिता
जगतां धात्री तथा गन्धानुलेपनैः ॥ २९ ॥ भक्त्या समस्तै-

त्रिदशैर्दिव्यैर्धूपैस्तु धूपिता ॥ प्राह प्रसादसुमुखी समस्तान्प्रण-
तान्सुरान् ॥ ३० ॥ देव्युवाच ॥ ३१ ॥ व्रियतां त्रिदशास्स-
र्वे यदस्मत्तोऽभिवांछितम् ॥ ददाम्यहमतिप्रीत्या स्तवैरेभिः सु-
पूजिता ॥ ३२ ॥ देवा ऊचुः ॥ ३३ ॥ भगवत्या कृतं सर्वं
न किंचिदवशिष्यते ॥ यदयं निहतश्शत्रुरस्माकम् महिषासुरः॥
॥ ३४ ॥ यदि चापि वरो देयस्त्वया ऽस्माकम् महेश्वरि ॥
संस्मृता संस्मृता त्वं नो हिंसेथाः परमापदः ॥ ३५ ॥ यश्च मर्त्यः
स्तवैरेभिस्त्वां स्तोष्यत्यमलानने ॥ तस्य वित्तर्द्धिविभवैर्धनदारा-

दिसम्पदाम् ॥ ३६ ॥ वृद्धये ऽस्मत्प्रसन्ना त्वं भवेथाः सर्वदा ऽम्बिके ॥ ३७ ॥ ऋषिरुवाच ॥ ३८ ॥ इति प्रसादिता देवैर्जगतो ऽर्थे तथाऽऽत्मनः ॥ तथेत्युक्त्वा भद्रकाली बभूवांतर्हिता नृप ॥ ३९ ॥ इत्येतत्कथितम् भूप संभूता सा यथा पुरा ॥ देवी देवशरीरेभ्यो जगत्त्रयहितैषिणी ॥ ४० ॥ पुनश्च गौरीदेहा सा समुद्भूता यथा ऽभवत् वधाय दुष्टदैत्यानां तथा शुंभनिशुंभयोः ॥ ४१ ॥ रक्षणाय च लोकानां देवानामुपकारिणी ॥ तच्छृणुष्व मया ख्यातम् यथावत्कथयामि ते ॥ ४२ ॥ ॥❁॥ ॥❁॥

इति श्रीमार्कण्डेयपुराणे सावर्णिके
मन्वंतरे देवीमाहात्म्ये
शक्रादिस्तुतिः ॥ ४ ॥

ऋषिरुवाच ॥ १ ॥ पुरा शुंभनिशुंभाभ्यामसुराभ्यां शचीपतेः ॥ त्रैलोक्यं यज्ञभागाश्च हृता मद्बलाश्रयात् ॥ २ ॥ तावेव सूर्यतां तद्वदधिकारं तथैंदवम् ॥ कौबेरमथ याम्यं च चक्राते वरुणस्य च ॥ ३ ॥ तावेव पवनर्द्धिं च चक्रतुर्वह्निकर्म च ॥ ततो देवा विनिर्धूता भ्रष्टराज्याः पराजिताः ॥ ४ ॥ हृताधिकारास्त्रिदशास्ताभ्यां सर्वे निराकृताः ॥ महासुराभ्यां तां देवीं संस्मरंत्यपराजिताम् ॥ ५ ॥ तया ऽस्माकम् वरो दत्तो यथा ऽपत्सु स्मृता ऽखिलाः ॥ भवतां नाशयिष्यामि तत्क्षणा-

त्परमापदः ॥ ६ ॥ इति कृत्वा मतिं देवा हिमवंतं नगेश्वर-
स. म् ॥ जग्मुस्तत्र ततो देवीम् विष्णुमायाम्प्रतुष्टुवुः ॥ ७ ॥ अ.
देवा ऊचुः ॥ ८ ॥ नमो देव्यै महादेव्यै शिवायै सततं नमः ॥
२६. नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम् ॥ ९ ॥ रौ- ४.
द्रायै नमो नित्यायै गौर्यै धात्र्यै नमो नमः ॥ ज्योत्स्नायै चे-
न्दुरूपिण्यै सुखायै सततं नमः ॥ १० ॥ कल्याण्यै प्रणता वृद्ध्यै-
सिद्ध्यै कुर्मो नमो नमः ॥ नैर्ऋत्यै भूभृतां लक्ष्म्यै शर्वाण्यै ते
नमो नमः ॥ ११ ॥ दुर्गायै दुर्गपारायै सारायै सर्वकारिण्यै ॥ २६.

ख्यात्यै तथैव कृष्णायै धूम्रायै सततं नमः ॥ १२ ॥ अतिसौम्यातिरौद्रायै नतास्तस्यै नमो नमः ॥ नमो जगत्प्रतिष्ठायै देव्यै कृत्यै नमो नमः ॥ १३ ॥ या देवी सर्वभूतेषु विष्णुमायेति शब्दिता ॥ नमस्तस्यै ॥ १४ ॥ नमस्तस्यै ॥ १५ ॥ नमस्तस्यै नमो नमः ॥ १६ ॥ या देवी सर्वभूतेषु चेतनेत्यभिधीयते ॥ नमस्तस्यै ॥ १७ ॥ नमस्तस्यै ॥ १८ ॥ नमस्तस्यै नमो नमः ॥ १९ ॥ या देवी सर्वभूतेषु बुद्धिरूपेण संस्थिता ॥ नमस्तस्यै ॥ २० ॥ नमस्तस्यै ॥ २१ ॥ नमस्तस्यै नमो

नमः ॥ २२ ॥ या देवी सर्वभूतेषु निद्रारूपेण संस्थिता ॥ न-
मस्तस्यै ॥ २३ ॥ नमस्तस्यै ॥ २४ ॥ नमस्तस्यै नमो नमः ॥
॥ २५ ॥ या देवी सर्वभूतेषु क्षुधारूपेण संस्थिता ॥ नमस्तस्यै
॥ २६ ॥ नमस्तस्यै ॥ २७ ॥ नमस्तस्यै नमो नमः ॥ २८ ॥ या
देवी सर्वभूतेषु छायारूपेण संस्थिता ॥ नमस्तस्यै ॥ २९ ॥ न-
मस्तस्यै ॥ ३० ॥ नमस्तस्यै नमो नमः ॥ ३१ ॥ या देवी स-
र्वभूतेषु शक्तिरूपेण संस्थिता ॥ नमस्तस्यै ॥ ३२ ॥ नमस्तस्यै ॥
॥ ३३ ॥ नमस्तस्यै नमो नमः ॥ ३४ ॥ या देवी सर्वभूतेषु तृष्णा-

रूपेण संस्थिता ॥ नमस्तस्यै ॥ ३५ ॥ नमस्तस्यै ॥ ३६ ॥ नमस्त-
स्यै नमो नमः ॥ ३७ ॥ या देवी सर्वभूतेषु क्षांतिरूपेण संस्थि-
ता नमस्तस्यै ॥ ३८ ॥ नमस्तस्यै ॥ ३९ ॥ नमस्तस्यै
नमो नमः ॥ ४० ॥ या देवी सर्वभूतेषु ज़ातिरूपेण संस्थिता
॥ नमस्तस्यै ॥ ४१ ॥ नमस्तस्यै ॥ ४२ ॥ नमस्तस्यै नमो नमः
॥ ४३ ॥ या देवी सर्वभूतेषु लज्जारूपेण संस्थिता ॥ नमस्तस्यै ॥
४४ ॥ नमस्तस्यै ॥ ४५ ॥ नमस्तस्यै नमो नमः ॥ ४६ ॥ या
देवी सर्वभूतेषु शांतिरूपेण संस्थिता ॥ ४७ ॥ नमस्तस्यै ॥ ४८ ॥

नमस्तस्यै ॥ ४९ ॥ नमस्तस्यै नमो नमः ॥ ४९ ॥ या देवी सर्व
भूतेषु श्रद्धारूपेण संस्थिता नमस्तस्यै ॥ ५० ॥ नमस्तस्यै ॥ ५१॥
नमस्तस्यै नमो नमः ॥ ५२ ॥ या देवी सर्वभूतेषु कांतिरूपेण
संस्थिता ॥ नमस्तस्यै ॥ ५३ ॥ नमस्तस्यै ॥ ५४ ॥ नमस्तस्यै
नमो नमः ॥ ५५ ॥ या देवी सर्वभूतेषु लक्ष्मीरूपेण संस्थिता ॥
नमस्यस्यै ॥ ५६ ॥ नमस्तस्यै ॥ ५७ ॥ नमस्तस्यै नमो नमः
॥ ५८ ॥ या देवी सर्वभूतेषु वृत्तिरूपेण संस्थिता ॥ नमस्तस्यै ॥
५९ ॥ नमस्तस्यै ॥ ६० ॥ नमस्तस्यै नमो नमः ॥ ६१ ॥ या देवी सर्व-

भूतेषु धृतिरूपेण संस्थिता ॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥ या देवी सर्वभूतेषु स्मृतिरूपेण संस्थिता ॥ नमस्तस्यै॥ ६२॥ नमस्तस्यै॥ ६३॥ नमस्तस्यै नमो नमः॥ ६४॥ या देवी सर्वभूतेषु दया रूपेण संस्थिता ॥ नमस्तस्यै ॥ ६५ ॥ नमस्तस्यै ॥ ६६ ॥ नमस्तस्यै नमो नमः ॥ ६७ ॥ या देवी सर्वभूतेषु तुष्टि-रूपेण संस्थिता ॥ नमस्तस्यै ॥ ६८ ॥ नमस्तस्यै ॥ ६९ ॥ नमस्तस्यै नमो नमः ॥ ७० ॥ या देवी सर्वभूतेषु पुष्टिरूपेण संस्थिता नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ या देवी सर्वभूतेषु

मातृरूपेण संस्थिता ॥ नमस्तस्यै ॥७१॥ नमस्तस्यै ॥७२॥ नमस्तस्यै
नमो नमः ॥ ७३ ॥ या देवी सर्वभूतेषु भ्रांतिरूपेण संस्थिता ॥
नमस्तस्यै ॥ ७४ ॥ नमस्तस्यै ॥ ७५ ॥ नमस्तस्यै नमो नमः
॥ ७६ ॥ इन्द्रियाणामधिष्ठात्री भूतानां चाखिलेषु या ॥ भूते-
षु सततं तस्यै व्याप्त्यै देव्यै नमो नमः ॥ ७७ ॥ चितिरूपे-
ण या कृत्स्नमेतद् व्याप्य स्थिता जगत् ॥ नमस्तस्यै ॥ ७८ ॥
नमस्तस्यै ॥ ७९ ॥ नमस्तस्यै नमो नमः ॥ ८० ॥ स्तुता सु-
रैः पूर्वमभीष्टसंश्रयात्तथा सुरेन्द्रेण दिनेषु सेविता ॥ करोतु सा

नः शुभहेतुरीश्वरी शुभानि भद्राण्यभिहंतु चापदः ॥ ८१ ॥ या साम्प्रतं चोद्धतदैत्यतापितैरस्माभिरीशा च सुरैर्नमस्यते ॥ या च स्मृता तत्क्षणमेव हन्ति नः सर्वापदो भक्तिविनम्रमूर्तिभिः ॥ ॥ ८२ ॥ ऋषिरुवाच ॥ ८३ ॥ एवं स्तवादियुक्तानां देवानां तत्र पार्वती ॥ स्नातुमभ्याययौ तोये जाह्नव्या नृपनन्दन ॥ ८४ ॥ साऽब्रवीत्तान्सुरान्सुभ्रूर्भवद्भिः स्तूयतेऽत्र का ॥ शरीरकोशतश्चास्याः समुद्भूताऽब्रवीच्छिवा ॥ ८५ ॥ स्तोत्रम् ममैतत्क्रियते शुंभदैत्यनिराकृतैः ॥ देवैः समस्तैः समरे निशुंभेन पराजितैः ॥ ८६ ॥

स. शरीरकोशाद्यत्तस्याः पार्वत्या निःसृता ऽम्बिका ॥ कौशिकीति अ.
समस्तेषु ततो लोकेषु गीयते ॥ ८७ ॥ तस्यां विनिर्गतायां तु
३०. कृष्णा ऽभूत्सा ऽपि पार्वती ॥ कालिकेति समाख्याता हिमाचल- ४.
कृताश्रया ॥ ८८ ॥ ततो ऽम्बिकाम्परं रूपम् बिभ्राणां सुम-
मोहरम् ॥ ददर्श चण्डो मुण्डश्च भृत्यौ शुंभनिशुंभयोः ॥ ८९ ॥ ता-
भ्यां शुभाय चाख्याता अतीवसुमनोहरा ॥ काप्यास्ते स्त्री महा-
राज भासयंती हिमाचलम् ॥ ९० ॥ नैव तादृक् क्वचिद्रूपं दृष्टं
केनचिदुत्तमम् ॥ ज्ञायतां काप्यसौ देवी गृह्यतां चासुरेश्वर ॥ ३०.

स. थक् ॥ ८ ॥ त्रैलोक्ये वररत्नानि मम वश्यान्यशेषतः ॥ तथैव ग- अ.
जरत्नानि हृत्वा देवेंद्रवाहनम् ॥ ९ ॥ क्षीरोदमथनोद्भूतमश्वरत्नं म-
३२. मामरैः ॥ उच्चैःश्रवससंज्ञं तत्प्रणिपत्य समर्पितम् ॥ १० ॥ यानि ५.
चान्यानि देवेषु गन्धर्वेषूरगेषु च ॥ रत्नभूतानि भूतानि तानि म-
य्येव शोभने ॥ ११ ॥ स्त्रीरत्नभूतां त्वां देवि लोके मन्यामहे व-
यम् ॥ सा त्वमस्मानुपागच्छ यतो रत्नभुजो वयम् ॥ १२ ॥ मां
वा ममानुजं वापि निशुंभमुरुविक्रमम् ॥ भज त्वं चंचलापांगि र-
त्नभूताऽसि वै यतः ॥ १३ ॥ परमैश्वर्यमतुलं प्राप्स्यसे मत्परिग्र- ३२.

चेति च वक्तव्या सा गत्वा वचनान्मम ॥ यथा चाभ्येति सं-
प्रीत्या तथा कार्यं त्वया लघु ॥ ३ ॥ ऋषिरुवाच ॥ स तत्र गत्वा
यत्रास्ते शैलोद्देशेऽतिशोभने ॥ तां च देवीं ततः प्राह श्लक्ष्णं
मधुरया गिरा ॥ ४ ॥ दूत उवाच ॥ देवि दैत्येश्वरः शुंभस्त्रैलो-
क्ये परमेश्वरः ॥ दूतोऽहं प्रेषितस्तेन त्वत्सकाशमिहागतः ॥
॥ ६ ॥ अव्याहताज्ञः सर्वासु यः सदा देवयोनिषु ॥ निर्जिताखि-
लदैत्यारिः स यदाह श्रृणुष्व तत् ॥ ७ ॥ मम त्रैलोक्यमखिलं
मम देवा वशानुगाः ॥ यज्ञभागानहं सर्वानुपाश्नामि पृथक् पृ-

रुणं गेहे कांचनस्त्रावि तिष्ठति ॥ तथाऽयं स्यंदनवरो यः पुरा ऽऽसीत्प्रजापतेः ॥ ९७ ॥ मृत्योरुत्क्रांतिदा नाम शक्तिरीश त्वया हृता ॥ पाशः सलिलराजस्य भ्रातुस्तव परिग्रहे ॥ ९८ ॥ निशुंभस्याब्धिजाताश्च समस्ता रत्नजातयः ॥ वह्निरपि ददौ तुभ्यमग्निशौचे च वाससी ॥ ९९ ॥ एवं दैत्येन्द्र रत्नानि समस्तान्याहृतानि ते ॥ स्त्रीरत्नमेषा कल्याणी त्वया कस्मान्न गृह्यते ॥ ॥ १०० ॥ ऋषिरुवाच ॥ निशम्येति वचः शुंभः स तदा चण्डमुण्डयोः ॥ प्रेषयामास सुग्रीवं दूतं देव्या महासुरः ॥ २ ॥ इति

॥ ९१ ॥ स्त्रीरत्नमतिचार्वंगी द्योतयन्ती दिशस्त्विषा ॥ सा तु ति-
ष्ठति दैत्येन्द्र ताम् भवान्द्रष्टुमर्हति ॥ ९२॥ यानि रत्नानि मण-
यो गजाश्वादीनि वै प्रभो ॥ त्रैलोक्ये तु समस्तानि सांप्रतं
भांति ते गृहे ॥ ९३ ॥ ऐरावतः समानीतो गजरत्नं पुरंदरात् ॥
पारिजाततरुश्चायं तथैवोच्चैःश्रवा हयः ॥ ९४ ॥ विमानं हंससं-
युक्तमेतत्तिष्ठति तेऽङ्गणे ॥ रत्नभूतमिहानीतं यदाऽसीद्वेधसोऽद्भु-
तम् ॥ ९५ ॥ निधिरेष महापद्मः समानीतो धनेश्वरात् ॥ किंज-
ल्किनीं ददौ चाब्धिर्मालामम्लानपंकजाम् ॥ ९६ ॥ छत्रन्ते वा-

हात् ॥ एतद्बुध्या समालोच्य मत्परिग्रहतां व्रज ॥ १४ ॥
ऋषिरुवाच ॥ १५ ॥ इत्युक्ता सा तदा देवी गम्भीरां-
तःस्मिता जगौ ॥ दुर्गा भगवती भद्रा ययेदं धार्यते ज-
गत् ॥ १६ ॥ देव्युवाच ॥ १७ ॥ सत्यमुक्तन्त्वया नात्र मिथ्या-
किंचित्त्वयोदितम् ॥ त्रैलोक्याधिपतिः शुंभो निशुंभश्चापि तादृशः
॥१८॥ किन्त्वत्र यत्प्रतिज्ञातं मिथ्या तत्क्रियते कथम् ॥ श्रूयताम-
ल्पबुद्धित्वात्प्रतिज्ञा या कृता पुरा ॥ १९ ॥ यो मां जयति सं-
ग्रामे यो मे दर्पं व्यपोहति ॥ यो मे प्रतिबलो लोके स मे

स. भर्ता भविष्यति ॥ २० ॥ तदागच्छतु शुंभो ऽत्र निशुंभो वा म- अ.
हासुरः ॥ मां जित्वा किं चिरेणात्र पाणिं गृह्णातु मे लघु ॥ २१ ॥
३३. दूत उवाच ॥ २१ ॥ अवलिप्ता ऽसि मैवं त्वं देवि ब्रूहि ममाग्रतः ५.
त्रैलोक्ये कः पुमांस्तिष्ठेदग्रे शुंभनिशुंभयोः ॥ २३ ॥ अन्येषामपि
दैत्यानां सर्वेदेवा न वै युधि ॥ तिष्ठंति संमुखे देवि किं पुनः स्त्री
त्वमेकिका ॥ २४ ॥ इन्द्राद्यास्सकला देवास्तस्थुर्येषां न सं-
युगे ॥ शुंभादीनां कथं तेषां स्त्री प्रयास्यसि संमुखम् ॥ २५ ॥
सा त्वं गच्छ मयैवोक्ता पार्श्वं शुंभनिशुंभयोः ॥ केशाकर्षणनि- ३३.

धूतगौरवा मा गमिष्यसि ॥ २६ ॥ देव्युवाच ॥ २७ ॥ एवमेतद्बली शुंभो निशुंभश्चातिवीर्यवान् ॥ किं करोमि प्रतिज्ञा मे यदनालोचिता पुरा ॥ २८ ॥ स त्वं गच्छ मयोक्तं ते यदेतत्सर्वमादृतः ॥ तदाचक्ष्वासुरेंद्राय स च युक्तं करोतु तत् ॥ १२९ ॥

इति श्रीमार्कण्डेयपुराणे सावर्णिके
मन्वंतरे देवीमाहात्म्ये
दूतवाक्यम् ॥ ५ ॥

ऋषिरुवाच ॥ १ ॥ इत्याकर्ण्य वचो देव्याः स दूतो ऽमर्षपूरितः ॥
समाचष्ट समागम्य दैत्यराजाय विस्तरात् ॥ २ ॥ तस्य दूतस्य
तद्वाक्यमाकर्ण्यासुरराट् ततः ॥ सक्रोधः प्राह दैत्यानामधिपं
धूम्रलोचनम् ॥ ३ ॥ हे धूम्रलोचनाशु त्वं स्वसैन्यपरिवारितः ॥
तामानय बलाद् दुष्टां केशाकर्षणविह्वलाम् ॥ ४ ॥ तत्परित्राण-
दः कश्चिद्यदिवोत्तिष्ठते परः ॥ स हंतव्यो ऽमरो वापि यक्षो
गंधर्व एव वा ॥ ५ ॥ ऋषिरुवाच ॥ ६ ॥ तेनाज्ञप्तस्ततः
शीघ्रं स दैत्यो धूम्रलोचनः ॥ वृतः षष्ट्या सहस्राणामसुराणां

द्रुतं ययौ ॥ ७ ॥ स दृष्ट्वा तां ततो देवीं तुहिनाचलसंस्थिता-
म् ॥ जगादोच्चैः प्रयाहीति मूलं शुंभनिशुंभयोः ॥ ८ ॥ न
चेत्प्रीत्या ऽद्य भवती मद्भर्तारमुपैष्यति ॥ ततो बलान्नयाम्येष
केशाकर्षणविह्वलाम् ॥ ९ ॥ देव्युवाच ॥ १० ॥ दैत्येश्वरेण
प्रहितो बलवान्बलसंवृतः ॥ बलान्नयसि मामेवं ततः किं ते क-
रोम्यहम् ॥ ऋषिरुवाच ॥ १२ ॥ इत्युक्तः सो ऽभ्यधावत्तामसुरो
धूम्रलोचनः ॥ हूंकारेणैव तं भस्मसाच्चकारांबिका ततः ॥ १३ ॥
अथ क्रुद्धं महासैन्यमसुराणां तथाऽम्बिका ॥ ववर्ष सायकैस्ती-

क्ष्णैस्तथा शक्तिपरश्वधैः ॥ १४ ॥ ततो धुतसटः कोपात्कृ-
त्वा नादं सुभैरवम् ॥ पपातासुरसेनायां सिंहो देव्याः स्ववा-
हनः ॥ १५ ॥ कांश्चित्करप्रहारेण दैत्यानास्येन चापरान् ॥
आक्रांत्या चाधरेणान्यान् जघानाशु महासुरान् ॥ १६ ॥
केषांचित्पाटयामास नखैः कोष्ठानि केसरी ॥ तथा तलप्र-
हारेण शिरांसि कृतवान्पृथक् ॥ १७ ॥ विच्छिन्नबाहुशिर-
सः कृतास्तेन तथा परे ॥ पपौ च रुधिरं कोष्ठादन्येषां धुत-
केसरः ॥ १८ ॥ क्षणेन तद्बलं सर्वं क्षयं नीतं महात्मना ॥

तेन केसरिणा देव्या वाहनेनातिकोपिना ॥ १९ ॥ श्रुत्वा तमसु-
रं देव्या निहतं धूम्रलोचनम् ॥ बलं च क्षयितं कृत्स्नं देवीकेस-
रिणा ततः ॥ २० ॥ चुकोप दैत्याधिपतिः शुंभः प्रस्फुरिता-
धरः ॥ आज्ञापयामास च तौ चंडमुण्डौ महासुरौ ॥ २१ ॥
हे चण्ड हे मुण्ड बलैर्बहुलैः परिवारितौ ॥ तत्र गच्छतं गत्वा
च सा समानीयतां लघु ॥ २२ ॥ केशेष्वाकृष्य बध्वा वा यदि
वः संशयो युधि ॥ तदाशेषायुधैः सर्वैरसुरैर्विनिहन्यताम् ॥ २३ ॥
तस्यां हतायां दुष्टायां सिंहे च विनिपातिते ॥ शीघ्रमागम्यतां

स. ३६.

बध्वा गृहीत्वा तामथाम्बिकाम् ॥ २४ ॥ ॥❀॥ ॥❀॥

इति श्रीमार्कण्डेयपुराणे सावर्णिके
मन्वन्तरे देवीमाहात्म्ये
धूम्रलोचनवधः ॥ ६ ॥

अ. ६. ३६.

ऋषिरुवाच ॥ १ ॥ आज्ञप्तास्ते ततो दैत्याश्चंडमुंडपुरोगमाः ॥ चतुरंगबलोपेता ययुरभ्युद्यतायुधाः ॥ २ ॥ ददृशुस्ते ततो देवीमीषद्धासां व्यवस्थिताम् ॥ सिंहस्योपरि शैलेंद्रशृंगे महति कांचने ॥ ३ ॥ ते दृष्ट्वा तां समादातुमुद्यमं चक्रुरुद्यताः ॥ आकृष्टचापासिधरास्तथाऽन्ये तत्समीपगाः ॥ ४ ॥ ततः कोपं चकारोच्चैरंबिका तानरीन्प्रति ॥ कोपेन चास्या वदनं मशीवर्णमभूत्तदा ॥ ५ ॥ भ्रुकुटीकुटिलात्तस्या ललाटफलकाद्द्रुतम् ॥ काली करालवदना विनिष्क्रांताऽसिपाशिनी ॥ ६ ॥ विचित्रखट्वांग-

धरा नरमालाविभूषणा ॥ द्वीपिचर्मपरीधाना शुष्कमांसातिभैर-
वा ॥ ७ ॥ अतिविस्तारवदना जिह्वाललनभीषणा ॥ निमग्ना र-
क्तनयना नादापूरितदिङ्मुखा ॥ ८ ॥ सा वेगेनाभिपतिता घात-
यन्ती महासुरान् ॥ सैन्ये तत्र सुरारीणामभक्षयत तद्बलम् ॥
॥ ९ ॥ पार्ष्णिग्राहांकुशग्राहियोधघंटासमन्वितान् ॥ समादायै-
कहस्तेन मुखे चिक्षेप वारणान् ॥ १० ॥ तथैव योधं तुरगैरथं
सारथिना सह ॥ निक्षिप्य वक्त्रे दशनैश्चर्वयत्यातिभैरवम् ॥
॥ ११ ॥ एकं जग्राह केशेषु ग्रीवायामथ चापरम् ॥ पादेनाक्रम्य

चैवान्यमुरसाऽन्यमपोथयत् ॥ १२ ॥ तैर्मुक्तानि च शस्त्राणि म-
हास्त्राणि तथाऽसुरैः ॥ मुखेन जग्राह रुषा दशनैर्मथितान्यपि ॥
॥ १३ ॥ बलिनां तद्बलं सर्वमसुराणाम्महात्मनाम् ॥ ममर्दाभक्ष-
यच्चान्यानन्यांश्चाताडयत्तदा ॥ १४ ॥ असिना निहताः केचि-
त्केचित्खट्वांगताडिताः ॥ जग्मुर्विनाशमसुरा दंताग्राभिहतास्त-
था ॥ १५ ॥ क्षणेन तद्बलं सर्वमसुराणां निपातितम् ॥ दृष्ट्वा च-
ण्डो ऽभिदुद्राव तां कालीमतिभीषणाम् ॥ १६ ॥ शरवर्षैर्महाभी-
मैर्भीमाक्षीं तां महासुरः ॥ छादयामास चक्रैश्च मुण्डः क्षिप्तैः

सहस्रशः ॥ १७ ॥ तानि चक्राण्यनेकानि विशमानानि तन्मु-
खम् ॥ बभुर्यथाऽर्कबिंबानि सुबहूनि घनोदरम् ॥ १८ ॥ ततो जहा-
सातिरुषा भीमं भैरवनादिनी ॥ कालीकरालवक्रांतर्दुर्दर्शदश-
नोज्ज्वला ॥ १९ ॥ उत्थाय च महासिंहाद् देवी चण्डमधावत ॥
गृहीत्वा चास्य केशेषु शिरस्तेनासिनाऽच्छिनत् ॥ २० ॥ अथ
मुण्डोऽभ्यधावत्तां दृष्ट्वा चंडं निपातितम् ॥ तमप्यपातयद् भूमौ
सा खड्गाभिहतं रुषा ॥ २१ ॥ हतशेषं ततः सैन्यं दृष्ट्वा चण्डं
निपातितम् ॥ मुण्डं च सुमहावीर्यं दिशो भेजे भयातुरम् ॥ २२ ॥

शिरश्चंडस्य काली च गृहीत्वा मुण्डमेव च ॥ प्राह प्रचडाट्ट-
हासमिश्रमभ्येत्य चण्डिकाम् ॥ २३ ॥ मया तवात्रोपहृतौ चण्ड-
मुंडौ महापशू ॥ युद्धयज्ञे स्वयं शुंभं निशुंभं च हनिष्यसि ॥
॥ २४ ॥ ऋषिरुवाच ॥ २५ ॥ तावानीतौ ततो दृष्ट्वा चंडमुण्डौ
महासुरौ ॥ उवाच कालीं कल्याणी ललितं चण्डिका वचः ॥
॥ २६ ॥ यस्माच्चण्डं च मुण्डं च गृहीत्वा त्वमुपागता ॥ चामुं-
डेति ततो लोके ख्याता देवि भविष्यसि ॥ २७ ॥ ॥❀॥

इति श्रीमार्कण्डेयपुराणे सावर्णिके
मन्वंतरे देवीमाहात्म्ये
चण्डमुण्डवधः ॥ ७ ॥

ऋषिरुवाच ॥ १ ॥ चंडे च निहते दैत्ये मुंडे च विनिपातिते ॥ बहुलेषु च सैन्येषु क्षयितेष्वसुरेश्वरः ॥ २ ॥ ततः कोपपराधीनचेताः शुंभः प्रतापवान् ॥ उद्योगं सर्वसैन्यानां दैत्यानामादिदेश ह ॥ ३ ॥ अद्य सर्वबलैर्दैत्याः षडशीतिरुदायुधाः ॥ कंबूनां चतुरशीतिर्निर्यांतु स्वबलैर्वृताः ॥ ४ ॥ कोटिवीर्याणि पंचाशदसुराणां कुलानि वै ॥ शतं कुलानि धौम्राणां निर्गच्छन्तु ममाज्ञया ॥ ५ ॥ कालका दौर्हृदा मौर्याः कालकेयास्तथाऽसुराः ॥ युद्धाय सज्जा निर्यांतु आज्ञया

त्वरिता मम ॥ ६ ॥ इत्याज्ञाप्यासुरपतिः शुंभो भैरवशासनः ॥
निर्जगाम महासैन्यसहस्त्रैर्बहुभिर्वृतः ॥ ७ ॥ आयातं चंडि-
का दृष्ट्वा तत्सैन्यमतिभीषणम् ॥ ज्यास्वनैः पूरयामास धर-
णीगगनांतरम् ॥ ८ ॥ ततः सिंहो महानादमतीव कृतवान्नृप ॥
घण्टास्वनेन तान्नादानम्बिका चोपबृंहयत् ॥ ९ ॥ धनुर्ज्यासिंहघं-
टानां नादापूरितदिङ्मुखा ॥ निनादैर्भीषणैः काली जिग्ये वि-
स्तारितानना ॥ १० ॥ तन्निनादमुपश्रुत्य दैत्यसैन्यैश्चतुर्दिशम् ॥
देवीसिंहस्तथा काली सरोषैः परिवारिता ॥ ११ ॥ एतस्मिन्नंतरे

भूप विनाशाय सुरद्विषाम् ॥ भवायामरसिंहानामतिवीर्यबला-
न्विताः ॥ १२ ॥ ब्रह्मेशगुहविष्णूनां तथेन्द्रस्य च शक्तयः ॥ शरीरे-
भ्यो विनिष्क्रम्य तद्रूपैश्चंडिकां ययुः ॥ १३ ॥ यस्य देवस्य यद् रू-
पं यथा भूषणवाहनम् ॥ तद्वदेव हि तच्छक्तिरसुरान्योद्धुमाय-
यौ ॥ १४ ॥ हंसयुक्तविमानाग्रे साक्षसूत्रकमण्डलुः ॥ आयाता
ब्रह्मणः शक्तिर्ब्रह्माणी सा ऽभिधीयते ॥ १५ ॥ माहेश्वरी वृषारू-
ढा त्रिशूलवरधारिणी ॥ महाहिवलया प्राप्ता चन्द्ररेखाविभूषणा
॥ १६ ॥ कौमारी शक्तिहस्ता च मयूरवरवाहना ॥ योद्धुमभ्याय-

यौ दैत्यानंबिका गुहरूपिणी ॥ १७ ॥ तथैव वैष्णवी शक्तिर्गरुडो-
परि संस्थिता ॥ शंखचक्रगदाशार्ङ्गखड्गहस्ता ऽभ्युपाययौ ॥ १८ ॥
यज्ञवाराहमतुलं रूपं या बिभ्रतो हरेः ॥ शक्तिः सा प्यायययौ तत्र
वाराहीं बिभ्रती तनुम् ॥ १९ ॥ नारसिंही नृसिंहस्य बिभ्रती स-
दृशं वपुः ॥ प्राप्ता तत्र सटाक्षेपक्षिप्तनक्षत्रसंहतिः ॥ २० ॥ वज्र-
हस्ता तथैवैन्द्री गजराजोपरि स्थिता ॥ प्राप्ता सहस्रनयना यथा
शक्रस्तथैव सा ॥ २१ ॥ ततः परिवृतस्ताभिरीशानो देवशक्ति-
भिः ॥ हन्यंतामसुराः शीघ्रं मम प्रीत्याऽऽह चंडिकाम् ॥ २२ ॥

ततो देवी शरीरात्तु विनिष्क्रांता ऽतिभीषणा ॥ चण्डिकाश-
क्तिरत्युग्रां शिवाशतनिनादिनी ॥ २३ ॥ सा चाह धूम्रजटिल-
मीशानमपराजिता ॥ दूतत्वं गच्छ भगवन् पार्श्वं शुंभनिशुंभ-
योः ॥ २४ ॥ ब्रूहि शुंभं निशुंभं च दानवावतिगर्वितौ ॥ ये चा-
न्ये दानवास्तत्र युद्धाय समुपस्थिताः ॥ २५ ॥ त्रैलोक्यमिंद्रो
लभतां देवाः संतु हविर्भुजः ॥ यूयं प्रयात पातालं यदि जीवि-
तुमिच्छथ ॥ २६ ॥ बलावलेपादथ चेद्भवंतो युद्धकांक्षिणः ॥ त-
दागच्छत तृप्यन्तु मच्छिवाः पिशितेन वः ॥ २७ ॥ यतो

नियुक्तो दौत्येन तया देव्या शिवः स्वयम् ॥ शिवदूतीति लो
केऽस्मिंस्ततः सा ख्यातिमागता ॥ २८ ॥ तेपि श्रुत्वा वचो-
देव्याः शर्वाख्यातम्महासुराः ॥ अमर्षापूरिता जग्मुर्यत्र कात्याय-
नी स्थिता ॥ २९ ॥ ततः प्रथममेवाग्रे शरशक्त्यृष्टिवृष्टिभिः ॥
ववर्षुरुद्धतामर्षास्तां देवीममरारयः ॥३०॥ सा च तत्प्रहितान्बाणा-
ञ्छूलशक्तिपरश्वधान् ॥ चिच्छेद लीलयाध्मातधनुर्मुक्तैर्महेषुभिः
॥३१॥ तस्याग्रतस्तथाकाली शूलपातविदारितान् ॥ षट्वांगपोथि-
तांश्चारीन्कुर्वन्ती व्यचरत्तदा ॥ ३२ ॥ कमण्डलुजलाक्षेपहतवीर्या

न्हतौजसः ॥ ब्रह्माणी चाकरोच्छत्रून्येन येन स्मधावति ॥ ३३ ॥
माहेश्वरी त्रिशूलेन तथा चक्रेण वैष्णवी ॥ दैत्याञ्जघान कौमा-
री तथा शक्त्या ऽतिकोपना ॥ ३४ ॥ ऐन्द्रीकुलिशपातेन शतशो
दैत्यदानवाः ॥ पेतुर्विदारिताः पृथ्व्यां रुधिरौघप्रवर्षिणः ॥ ३५ ॥
तुण्डप्रहारविध्वस्ता दंष्ट्राग्रक्षतवक्षसः ॥ वराहमूर्त्या न्यपतंश्चक्रेण
च विदारिताः ॥ ३६ ॥ नखैर्विदारितांश्चान्यान्भक्षयन्ती महा-
सुरान् ॥ नारसिंही चचाराजौ नादापूर्णदिगम्बरा ॥ ३७ ॥
चण्डाट्टहासैरसुराः शिवदूत्यभिदूषिताः ॥ पेतुः पृथिव्याम् पतितां

स. स्तांश्चखादाथ सा तदा ॥ ३८ ॥ इति मातृगणं क्रुद्धम् मर्दयन्तम् अ.
महासुरान् ॥ दृष्ट्वा ऽभ्युपायैर्विविधैर्नेशुर्देवारिसैनिकाः ॥ ३९ ॥
४३. पलायनपरान्दृष्ट्वा दैत्यान्मातृगणार्दितान् ॥ योद्धुमभ्याययौ ८.
क्रुद्धो रक्तबीजो महासुरः ॥ ४० ॥ रक्तबिन्दुर्यदा भूमौ पत-
त्यस्य शरीरतः ॥ समुत्पतति मेदिन्यान्तत्प्रमाणस्तदा ऽसुरः
॥ ४१ ॥ युयुधे स गदापाणिरिन्द्रशक्त्या महासुरः ॥ ततश्चैन्द्री
स्ववज्रेण रक्तबीजमताडयत् ॥ ४२ ॥ कुलिशेनाहतस्याशु तस्य सु-
स्राव शोणितम् ॥ समुत्तस्थुस्ततो योधास्तद्रूपास्तत्पराक्रमाः ॥४३॥ ४३.

यावन्तः पतितास्तस्य शरीराद् रक्तविन्दवः ॥ तावन्तः पुरुषा जा-
तास्तद्वीर्यबलविक्रमाः ॥ ४४ ॥ ते चापि युयुधुस्तत्र पुरुषा रक्त-
सम्भवाः ॥ समम् मातृभिरत्युग्रं शस्त्रपातातिभीषणम् ॥ ४५ ॥
पुनश्च वज्रपातेन क्षतमस्याशिरो यदा ॥ ववाह रक्तम् पुरुषास्ततो
जाताः सहस्रशः ॥ ४६ ॥ वैष्णवी समरे चैनञ्चक्रेणाभिजघान
ह ॥ गदया ताडयामास ऐन्द्री तमसुरेश्वरम् ॥ ४७ ॥ वैष्णवी-
चक्राभिन्नस्य रुधिरस्रावसम्भवैः॥ सहस्रशो जगद् व्याप्तन्तत्प्रमा-
णैर्महासुरैः ॥ ४८ ॥ शक्त्या जघान कौमारी बाराही च तथा

ऽसिना ॥ माहेश्वरी त्रिशूलेन रक्तबीजम् महासुरम् ॥४९॥ स चा-
पि गदया दैत्यः सर्वा एवाऽहनत्पृथक् ॥ मातॄः कोपसमाविष्टो र-
क्तबीजो महासुरः ॥ ५० ॥ तस्याहतस्य बहुधा शक्तिशूलादिभि-
र्भुवि ॥ पपात यो वै रक्तौघस्तेनासञ्छतशोऽसुराः ॥ ५१ ॥ तैश्चासु-
रासृक्सम्भूतैरसुरैस्सकलञ्जगत् ॥ व्याप्तमासीत्ततो देवा भय-
माजग्मुरुत्तमम् ॥ ५२ ॥ तान्विषण्णान्सुरान्दृष्ट्वा चंडिका
प्राह सत्त्वराम् ॥ उवाच कालीञ्चामुण्डे विस्तरं वदनं कुरु ॥५३॥
मच्छस्त्रपातसम्भूतान् रक्तविन्दून्महासुरान् ॥ रक्तविन्दोः प्रतीच्छ

त्वं वक्त्रेणानेन वेगिता ॥ ५४ ॥ भक्षयन्ती चर रणे तदुत्पन्ना-
न्महासुरान् ॥ एवमेष क्षयन्दैत्यः क्षीणरक्तो गमिष्यति ॥ ५५ ॥
भक्ष्यमाणास्त्वया चोग्रा न चोत्पत्स्यन्ति चापरे ॥ इत्युक्त्वा ता-
न्ततो देवी शूलेनाभिजघान तम् ॥ ५६ ॥ मुखेन काली जगृहे र-
क्तबीजस्य शोणितम् ॥ ततोऽसावाजघानाथ गदया तत्र चण्डि-
काम् ॥ ५७ ॥ न चास्या वेदनाञ्चक्रे गदापातोऽल्पिकामपि ॥ त-
स्याहतस्य देहात्तु बहु सुस्राव शोणितम् ॥ ५८ ॥ यतस्ततस्तद्व-
क्त्रेण चामुण्डा सम्प्रतीच्छति ॥ मुखे समुद्गता येऽस्या रक्त-

पातान्महासुराः ॥ ५९ ॥ तांश्चखादाथ चामुण्डा पपौ तस्य
च शोणितम् ॥ देवी शूलेन वज्रेण बाणैरसिभिर्ऋष्टिभिः ॥ ६० ॥
जघान रक्तबीजन्तश्चामुण्डापीतशोणितम् ॥ स पपात महीपृष्ठे श-
स्त्रसंघसमाहतः ॥ ६१ ॥ नीरक्तश्च महीपाल रक्तबीजो महासु-
रः ॥ ततस्ते हर्षमतुलमवापुस्त्रिदशा नृप ॥ ६२ ॥ तेषाम् मातृग-
णो जातो ननर्तासृङ्मदोद्धतः ॥ ६३ ॥ ॥*॥ ॥*॥

इति श्रीमार्कण्डेयपुराणे सावर्णिके
मन्वन्तरे देवीमाहात्म्ये
रक्तबीजवधः ॥ ८ ॥

राजोवाच ॥ १ ॥ विचित्रमिदमाख्यातम् भगवन्भवता मम ॥
देव्याश्चरितमाहात्म्यं रक्तबीजवधाश्रितम् ॥ २ ॥ भूयश्चेच्छाम्य-
हं श्रोतुं रक्तबीजे निपातिते ॥ चकार शुम्भो यत्कर्म निशुम्भश्चा-
तिकोपनः ॥ ३ ॥ ऋषिरुवाच ॥ ४ ॥ चकार कोपमतुलं रक्तबीजे
निपातिते ॥ शुम्भासुरो निशुम्भश्च हतेष्वन्येषु चाहवे ॥ ५ ॥ ह-
न्यमानम् महासैन्यं विलोक्यामर्षमुद्वहन् ॥ अभ्यधावन्निशुम्भो ऽथ
मुख्यया ऽसुरसेनया ॥ ६ ॥ तस्याग्रतस्तथा पृष्ठे पार्श्वयोश्च
महासुराः ॥ सन्दष्टौष्ठपुटाः क्रुद्धा हन्तुन्देवीमुपाययुः ॥ ७ ॥

आजगाम महावीर्यः शुम्भो ऽपि स्वबलैर्वृतः ॥ निहन्तुश्चण्डिकां
कोपात्कृत्वा युद्धन्तु मातृभिः ॥ ८ ॥ ततो युद्धमतीवासीद्देव्याः
शुम्भनिशुम्भयोः ॥ शरवर्षमतीवोग्रम् मेघयोरिव वर्षतोः ॥९॥ चि-
च्छेदास्ताञ्छरांस्ताभ्याञ्चण्डिका स्वशरोत्करैः ॥ ताडयामास
चाङ्गेषु शस्त्रौघैरसुरेश्वरौ ॥ १० ॥ निशुम्भो निशितं खड्गञ्चर्म
चादाय सुप्रभम् ॥ अताडयन्मूर्ध्नि सिंहन्देव्या वाहनमुत्तमम् ॥
॥ ११ ॥ ताडिते वाहने देवी क्षुरप्रेणासिमुत्तमम् ॥ निशुम्भस्याशु
चिच्छेद चर्म चाप्यष्टचन्द्रकम् ॥ १२ ॥ छिन्ने चर्मणि खड्गे च

शक्तिञ्चिक्षेप सो ऽसुरः॥ तामप्यस्य द्विधा चक्रे चक्रेणाभिमुखा-
गताम् ॥ १३ ॥ कोपाध्मातो निशुम्भो ऽथ शूलञ्जग्राह दानवः॥
आयातम् मुष्टिपातेन देवी तच्चाप्यचूर्णयत् ॥ १४ ॥ आविध्याञ्च
गदां सो ऽपि चिक्षेप चण्डिकाम् प्रति ॥ सा ऽपि देव्या त्रिशूलेन
भिन्ना भस्मत्वमागता ॥ १५ ॥ ततः परशुहस्तन्तमायन्तन्दैत्य-
पुङ्गवम् ॥ आहत्य देवी बाणौघैरपातयत भूतले ॥ १६ ॥ त-
स्मिन्निपतिते भूमौ निशुम्भे भीमविक्रमे ॥ भ्रातर्यतीवसंक्रुद्धः प्र-
ययौ हन्तुमम्बिकाम् ॥ १७ ॥ स रथस्थस्तथात्युच्चैर्गृहीतपरमायु-

धैः ॥ भुजैरष्टाभिरतुलैर्व्याप्याशेषं वभौ नभः ॥ १८ ॥ तमा-
यान्तं समालोक्य देवी शंखमवादयत् ॥ ज्याशब्दश्चापि धनु-
षश्चकारातीवदुःसहम् ॥ १९ ॥ पूरयामास ककुभो निजघण्टा-
स्वनेन च ॥ समस्तदैत्यसैन्यानान्तेजोवधविधायिना ॥ २० ॥
ततः सिंहो महानादैस्त्याजितेभमहामदैः ॥ पूरयामास गगनं
गां तथोपदिशो दश ॥ २१ ॥ ततः काली समुत्पत्य गगनं क्ष्मा
मताडयत् ॥ कराभ्यान्तन्निनादेन प्राक्स्वनास्ते तिरोहिताः ॥
॥ २२ ॥ अट्टाट्टहासमशिवं शिवदूती चकार ह ॥ तैः शब्दैरसु

राखेसुः शुम्भः कोपम् परं ययौ ॥ २३ ॥ दुरात्मंस्तिष्ठ तिष्ठेति
व्याजहाराम्बिका यदा ॥ तदा जयेत्यभिहितन्देवैराकाशासंस्थि-
तैः ॥ २४ ॥ शुम्भेनागत्य या शक्तिर्मुक्ता ज्वालातिभीषणा ॥
आयान्ती वन्हिकूटाभा सा निरस्ता महोल्कया ॥ २५ ॥ सिंह-
नादेन शुम्भस्य व्याप्तं लोकत्रयान्तरम्॥ निर्घातनिःस्वनो घोरो जि-
तवानवनीपते ॥२६॥ शुम्भमुक्ताञ्छरान्देवी शुम्भस्तंत्प्रहिताञ्छरा-
न् ॥ चिच्छेद स्वशरैरुग्रैः शतशो ऽथ सहस्रशः ॥ २७ ॥ ततः सा
चण्डिका क्रुद्धा शूलेनाभिजघान तम्॥ स तदा ऽभिहतो भूमौ मूर्छि-

तो निपपात ह ॥२८॥ ततो निशुम्भः सम्प्राप्य चेतनामात्तकार्मुकः ॥
आजघान शरैर्देवीं कालीं केसरिणन्तथा ॥ २९ ॥ पुनश्च कृत्वा बाहू-
नामयुतन्दनुजेश्वरः ॥ चक्रायुधेन दितिजश्छादयामास चण्डि-
काम् ॥ ३० ॥ ततो भगवती क्रुद्धा दुर्गा दुर्गार्तिनाशिनी ॥ चि-
च्छेद तानि चक्राणि स्वशरैः सायकांश्च तान् ॥ ३१ ॥ ततो नि-
शुम्भो वेगेन गदामादाय चण्डिकाम् ॥ अभ्यधावत वै हन्तुन्दै-
त्यसेनासमावृतः ॥ ३२ ॥ तस्यापतत एवाशु गदाञ्चिच्छेद च-
ण्डिका ॥ खड्गेन शितधारेण स च शूलं समाददे ॥ ३३ ॥ शूल-

स. हस्तन्तमायान्तं निशुम्भममरार्दनम् ॥ हृदि बिब्याध शूलेन अ.
वेगाविद्धेन चण्डिका ॥ ३४ ॥ भिन्नस्य तस्य शूलेन हृदयान्नि-
४९. स्सृतो ऽपरः ॥ महाबलो महावीर्यस्तिष्ठेति पुरुषो वदन् ॥ ३५ ॥ ९.
तस्य निष्क्रामतो देवी प्रहस्य स्वनवत्ततः ॥ शिरश्चिच्छेद ख-
ड्गेन ततो ऽसावपतद्भुवि ॥ ३६ ॥ ततः सिंहश्चखादोग्रं दंष्ट्राक्षु-
ण्णशिरोधरान् ॥ असुरास्तांस्तथा काली शिवदूती तथा ऽपरान्
॥ ३७ ॥ कौमारीशक्तिनिर्भिन्नाः केचिन्नेशुर्महासुराः ॥ ब्रह्माणी-
मन्त्रपूतेन तोयेनान्ये निराकृताः ॥ ३८ ॥ माहेश्वरीत्रिशूलेन ४९.

भिन्नाः पेतुस्तथाऽपरे ॥ वाराहीतुण्डघातेन केचिच्चूर्णीकृता
भुवि ॥ ३९ ॥ खण्डखण्डञ्च चक्रेण वैष्णव्या दानवाः कृताः ॥
वज्रेण चैन्द्रीहस्ताग्रविमुक्तेन तथाऽपरे ॥ ४० ॥ केचिद्विनेशुर-
सुराः केचिन्नष्टा महाहवात् ॥ भक्षिताश्चापरे कालीशिवदूतीमृ-
गाधिपैः ॥ ४१ ॥ ॥❁॥ ॥❁॥ ॥❁॥ ॥❁॥

इति श्रीमार्कण्डेयपुराणे सावर्णिके
मन्वन्तरे देवीमाहात्म्ये
निशुम्भवधः ॥ ९ ॥

स. ऋषिरुवाच ॥ १ ॥ निशुम्भं निहतन्दृष्ट्वा भ्रातरम् प्राणसम्मि- अ.
तम् ॥ हन्यमानम् बलञ्चैव शुम्भः क्रुद्धो ऽब्रवीद्वचः ॥ २ ॥ बलाव
५०. लेपाद्दुष्टे त्वम् मा दुर्गे गर्वमावह ॥ अन्यासाम् बलमाश्रित्य युध्य- ९.
से या ऽतिमानिनी ॥ ३ ॥ देव्युवाच ॥ ४ ॥ एकैवाहञ्जगत्यत्र द्वि-
तीया का ममापरा ॥ पश्यैता दुष्ट मय्येव विशन्त्यो मद्विभूतयः
॥ ५ ॥ ऋषिरुवाच ॥ ततस्समस्तास्ता देव्यो ब्रह्माणीप्रमुखा ल-
यम् ॥ तस्या देव्यास्तनौ जग्मुरेकैवासीत्तदा ऽम्बिका ॥ ६ ॥ देव्यु-
वाच ॥ ७ ॥ अहं विभूत्या बहुभिरिह रूपैर्यदा स्थिता ॥ तत्सं ५०.

हतम् मय्यैकैव तिष्ठाम्याजौ स्थिरो भव ॥ ८ ॥ ऋषिरुवाच ॥
॥ ९ ॥ ततः प्रववृते युद्धन्देव्याः शुम्भस्य चोभयोः ॥ पश्यतां
सर्वदेवानामसुराणाञ्च दारुणम् ॥ १० ॥ शरवर्षैः शितैःशस्त्रैस्त-
थास्त्रैश्चैव दारुणैः ॥ तयोर्युद्धमभूद्भूयःसर्वलोकभयंकरम् ॥ ११ ॥
दिव्यान्यस्त्राणि शतशो मुमुचे यान्यथाम्बिका ॥ बभञ्ज तानि
दैत्येन्द्रस्तत्प्रतीघातकर्तृभिः ॥ १२ ॥ मुक्तानि तेन चास्त्राणि
दिव्यानि परमेश्वरी ॥ बभञ्ज लीलयैवोग्रं हूंकारोच्चारणादिभिः
॥ १३ ॥ ततः शरशतैर्देवीमाच्छादयत सो ऽसुरः ॥ सा ऽपि त-

स. त्कुपिता देवी धनुश्चिच्छेद चेषुभिः ॥ १४ ॥ छिन्ने धनुषि दै- अ.
त्येन्द्रस्तथा शक्तिमथाददे ॥ चिच्छेद देवी चक्रेण तामप्यस्य करे
५१. स्थिताम् ॥ १५ ॥ ततः खड्गमुपादाय शतचन्द्रञ्च भानुमत् ॥ १०.
अभ्यधावत्तदा देवीन्दैत्यानामधिपेश्वरः ॥ १६ ॥ तस्यापतत ए-
वाशु खड्गञ्चिच्छेद चण्डिका ॥ धनुर्मुक्तैः शितैर्बाणैश्चर्म चार्क-
करामलम् ॥ १७ ॥ हताश्वः स तदा दैत्यश्छिन्नधन्वा विसार-
थिः ॥ जग्राह मुद्गरं घोरमम्बिकानिधनोद्यतः ॥ १८ ॥ चिच्छे-
दापततस्तस्य मुद्गरं निशितैः शरैः ॥ तथापि सो ऽभ्यधावत्ताम् ५१.

मुष्टिमुद्यम्य वेगवान् ॥१९॥ स मुष्टिम् पातयामास हृदये दैत्य-
पुङ्गवः ॥ देव्यास्तञ्चापि सा देवी तलेनोरस्यताडयत् ॥ २० ॥
तलप्रहाराभिहतो निपपात महीतले ॥ स दैत्यराजः सहसा पु-
नरेव तथोत्थितः ॥ २१ ॥ उत्पत्य च प्रगृह्योच्चैर्देवीं गगनमास्थि-
तः ॥ तत्रापि सा निराधारा युयुधे तेन चण्डिका ॥ २२ ॥
नियुद्धं खे तदा दैत्यश्चण्डिका च परस्परम् ॥ चक्रतुः प्रथमं
युद्धम् मुनिविस्मयकारकम् ॥ २३ ॥ ततो नियुद्धं सुचिरं कृत्वा
तेनाम्बिका सह ॥ उत्पात्य भ्रामयामास चिक्षेप धरणीतले ॥

स. ॥ २४ ॥ स क्षिप्तो धरणीम् प्राप्य मुष्टिमुद्यम्य वेगितः ॥ अभ्य- अ.
धावत दुष्टात्मा चण्डिकानिधनेच्छया ॥ २५ ॥ तमायान्तन्ततो
५२. देवी सर्वदैत्यजनेश्वरम् ॥ जगत्याम् पातयामास भित्त्वा शूलेन १०.
वक्षसि ॥ २६ ॥ स गतासुः पपातोर्व्यान्देवीशूलाग्रविक्षतः ॥
चालयन्त्सकलाम् पृथ्वीं साब्धिद्वीपां सपर्वताम् ॥ २७ ॥ ततः
प्रसन्नमखिलं हते तस्मिन्दुरात्मनि ॥ जगत्स्वास्थ्यमतीवाप
निर्मलञ्चाभवन्नभः ॥ २८ ॥ उत्पातमेघास्सोल्का ये प्रागा-
संस्ते शमं ययुः ॥ सरितो मार्गवाहिन्यस्तथाऽसंस्तत्र पातिते ॥ ५२.

॥ २९ ॥ ततो देवगणास्सर्वे हर्षनिर्भरमानसाः ॥ बभूवुर्निहते
तस्मिन् गन्धर्वा ललितञ्जगुः ॥ ३० ॥ अवादयंस्तथैवान्ये नं-
नृतुश्चाप्सरोगणाः ॥ ववुः पुण्यास्तथा वातास्सुप्रभोऽभूद्दिवा-
करः ॥ ३१ ॥ जज्वलुश्चाग्नयश्शान्ताश्शान्तादिग्जनितस्वनाः ॥
॥ ३२ ॥ ॥❀॥ ॥❀॥ ॥❀॥

इति श्रीमार्कण्डेयपुराणे सावर्णिके
मन्वन्तरे देवीमाहात्म्ये
शुम्भवधः ॥ १० ॥

ऋषिरुवाच ॥ १ ॥ देव्या हते तत्र महासुरेन्द्रे सेन्द्राः सुरा
वह्निपरोगमास्ताम् ॥ कात्यायनीन्तुष्टुवुरिष्टलाभाद्विकाशिवक्त्रा-
ब्जाविकाशिताशाः ॥ २ ॥ देवा ऊचुः ॥ देवि प्रपन्नार्त्तिहरे प्रसी-
द प्रसीद मातर्जगतो ऽखिलस्य ॥ प्रसीद विश्वेश्वरि पाहि वि-
श्वन्त्वमीश्वरी देवि चराचरस्य ॥ ३ ॥ आधारभूता जगतस्त्व-
मेका महीस्वरूपेण यतः स्थिता ऽसि ॥ अपां स्वरूपस्थितया त्वयै-
तदाप्याय्यते कृत्स्नमलङ्घ्यवीर्ये ॥ ४ ॥ त्वं वैष्णवी शक्तिरनन्त-
वीर्या विश्वस्य बीजम् परमाऽसि माया ॥ सम्मोहितन्देवि सम-

स्तमेतत्त्वं वै प्रसन्ना भुवि मुक्तिहेतुः ॥ ५ ॥ विद्याः समस्तास्त-
व देवि भेदाः स्त्रियः समस्ताःसकला जगत्सु ॥ त्वयैकया पूरितम-
म्बयैतत्का ते स्तुतिः स्तव्यपरा परोक्तिः ॥ ६ ॥ सर्वभूता यदा देवी
स्वर्गमुक्तिप्रदायिनी ॥ त्वं स्तुता स्तुतये का वा भवन्तु परमोक्तयः
॥७॥सर्वस्य बुद्धिरूपेण जनस्य हृदि संस्थिते ॥ स्वर्गापवर्गदे देवि
नारायणि नमो ऽस्तु ते ॥ ८ ॥ कलाकाष्ठादिरूपेण परिणाम-
प्रदायिनि ॥ विश्वस्योपरतौ शक्ते नारायणि नमो ऽस्तु ते ॥ ९ ॥
सर्वमंगलमंगल्ये शिवे सर्वार्थसाधिके ॥ शरण्ये त्र्यम्बके गौरि

नारायणि नमो ऽस्तु ते ॥ १० ॥ सृष्टिस्थितिविनाशानां शक्तिभूते
सनातनि ॥ गुणाश्रये गुणमये नारायणि नमो ऽस्तु ते ॥ ११ ॥
शरणागतदीनार्तपरित्राणपरायणे ॥ सर्वस्यार्तिहरे देवि नारा-
यणि नमो ऽस्तु ते ॥ १२ ॥ हंसयुक्तविमानस्थे ब्रह्माणीरूपधा-
रिणि ॥ कौशाम्भःक्षरिके देवि नारायणि नमो ऽस्तु ते ॥ १३ ॥
त्रिशूलचन्द्राहिधरे महावृषभवाहिनि ॥ माहेश्वरीस्वरूपेण ना-
रायणिनमो ऽस्तु ते ॥१४॥ मयूरकुक्कुटवृते महाशक्तिधरे ऽनघे ॥
कौमारीरूपसंस्थाने नारायणि नमो ऽस्तु ते ॥ १५ ॥ शंखचक्र-

गदाशार्ङ्गगृहीतपरमायुधे ॥ प्रसीद वैष्णवीरुपे नारायणि नमो ऽस्तु ते ॥ १६ ॥ गृहीतोग्रमहाचक्रे दंष्ट्रोद्धृतवसुन्धरे ॥ वराहरूपिणि शिवे नारायणि नमो ऽस्तु ते ॥ १७ ॥ नृसिंहरूपेणोग्रेण हन्तुन्दैत्यान्कृतोद्यमे ॥ त्रैलोक्यत्राणसहिते नारायणि नमो ऽस्तु ते ॥ १८ ॥ किरीटिनि महावज्रे सहस्रनयनोज्ज्वले ॥ वृत्रप्राणहरे चैन्द्रि नारायणि नमो ऽस्तु ते ॥ १९ ॥ शिवदूतीस्वरूपेण हतदैत्यमहाबले ॥ घोररूपे महारावे नारायणि नमो ऽस्तु ते ॥ २० ॥ दंष्ट्राकरालवदने शिरोमालाविभूषणे ॥ चामुण्डे मुण्डमथने नाराय-

णि नमो ऽस्तु ते ॥ २१ ॥ लक्ष्मिलज्जे महाविद्ये श्रद्धे पुष्टि स्वधे
ध्रुवे ॥ महारात्रि महाविद्ये नारायणि नमो ऽस्तु ते ॥ २२ ॥ मेधे
सरस्वतिवरे भूतिबाभ्रवि तामसि ॥ नियते त्वम् प्रसीदेशे ना-
रायणि नमो ऽस्तु ते ॥ २३ ॥ सर्वतः पाणिपादान्ते सर्वतोऽक्षि-
शिरोमुखि ॥ सर्वतःश्रवणघ्राणे नारायणि नमो ऽस्तु ते ॥ सर्व-
स्वरूपे सर्वेशे सर्वशक्तिसमन्विते ॥ भयेभ्यस्त्राहि नो देवि दुर्गे
देवि नमो ऽस्तु ते ॥ २४ ॥ एतत्ते वदनं सौम्यं लोचनत्रयभू-
षितम् ॥ पातु नः सर्वभीतिभ्यः कात्यायनि नमो ऽस्तु ते ॥ २५ ॥

ज्वालाकरालमत्युग्रमशेषासुरसूदनम् ॥ त्रिशूलम् पातु नो भीते-
र्भद्रकालि नमो ऽस्तु ते ॥ २६ ॥ हिनस्ति दैत्यतेजांसि स्वनेना-
पूर्य या जगत् ॥ सा घण्टा पातु नो देवि पापेभ्यो नः सुतानि-
व ॥ २७ ॥ असुरासृग्वसापंकचर्चितस्ते करोज्ज्वलः ॥ शुभाय
खड्गो भवतु चण्डिके त्वान् नता वयम् ॥ २८ ॥ रोगानशेषानपहंसि
तुष्टा रुष्टा तु कामान्त्सकलानभीष्टान् ॥ त्वामाश्रितानान् न विपन्न-
राणान् त्वामाश्रिता ह्याश्रयताम्प्रयान्ति ॥ २९ ॥ एतत्कृतं यत्कदन-
न्त्वयाऽद्य धर्मद्विषान्देवि महासुराणाम् ॥ रूपैरनेकैर्बहुधात्ममूर्तिङ्

कृत्वा ऽम्बिके तत्प्रकरोति का ऽन्या ॥ ३० ॥ विद्यासु शास्त्रेषु विवेक-
दीपेष्वाद्येषु वाक्येषु च का त्वदन्या ॥ ममत्वगर्ते ऽतिमहान्ध-
कारे विभ्रामयत्येतदतीव विश्वम् ॥ ३१ ॥ रक्षांसि यत्रोग्रविषाश्च
नागा यत्रारयो दस्युबलानि यत्र ॥ दावानलो यत्र तथा
ऽब्धिमध्ये तत्र स्थिता त्वम् परिपासि विश्वम् ॥ ३१ ॥ विश्वे-
श्वरि त्वम् परिपासि विश्वं विश्वात्मिका धारयसीति विश्वम् ॥
विश्वेशवन्द्या भवती भवन्ति विश्वाश्रया ये त्वयि भक्तिनम्राः
॥ ३३ ॥ देवि प्रसीद परिपालय नो ऽरिभीतेर्नित्यं यथा ऽसुरव-

धादधुनैव सद्यः ॥ पापानि सर्वजगताम् प्रशमं नयाशु उत्पा-
तपाकजनितांश्च महोपसर्गान् ॥ ३४ ॥ प्रणतानाम् प्रसीद त्वं-
न्देवि विश्वार्तिहारिणि ॥ त्रैलोक्यवासिनामीड्ये लोकानां वर-
दा भव ॥ ३५ ॥ देव्युवाच ॥ ३६ ॥ वरदा ऽहं सुरगणा वरं य-
न्मनसेच्छथ ॥ तं वृणुध्वम् प्रयच्छामि जगतामुपकारकम् ॥
॥ ३७ ॥ देवा ऊचुः ॥ ३८ ॥ सर्वबाधाप्रशमनन् त्रैलोक्यस्या-
खिलेश्वरि ॥ एवमेव त्वया कार्यमस्मद्वैरिविनाशनम् ॥ ३९ ॥
देव्युवाच ॥ ४० ॥ वैवस्वतेन्तरे प्राप्ते अष्टाविंशतिमे युगे ॥ शु-

म्भो निशुम्भश्चैवान्यावुत्पत्स्येते महासुरौ ॥ ४१ ॥ नन्दगोपगृहे
जाता यशोदागर्भसम्भवा ॥ ततस्तौ नाशयिष्यामि विन्ध्याच-
लनिवासिनी ॥ ४२ ॥ पुनरप्यतिरौद्रेण रूपेण पृथिवीतले ॥ अ-
वतीर्य हनिष्यामि वैप्रचित्तांस्तु दानवान् ॥ ४३ ॥ भक्षयन्त्याश्च
तानुग्रान्वैप्रचित्तान्महासुरान् ॥ रक्ता दन्ता भविष्यन्ति दाडि-
मीकुसुमोपमाः ॥ ४४ ॥ ततो मान्देवतास्स्वर्गे मर्त्यलोके च
मानवाः ॥ स्तुवन्तो व्याहरिष्यन्ति संततं रक्तदन्तिकाम् ॥४५॥
भूयश्च शतवार्षिक्यामनावृष्ट्यामनम्भसि ॥ मुनिभिः संस्तुता

भूमौ सम्भविष्याम्ययोनिजा ॥ ४६ ॥ ततः शतेन नेत्राणां
निरीक्षिष्यामि यन्मुनीन् ॥ कीर्तयिष्यन्ति मनुजाः शताक्षीमि-
ति मान्ततः ॥ ४७ ॥ ततोऽहमखिलं लोकमात्मदेहसमुद्भवैः ॥
भरिष्यामि सुराः शाकैरावृष्टेः प्राणधारकैः ॥ ४८ ॥ शाकम्भरी-
ति विख्यातिन्तदा यास्याम्यहम् भुवि ॥ तत्रैव च वधिष्यामि
दुर्गमाख्यम् महासुरम् ॥ ४९ ॥ दुर्गादेवीति विख्यातन्तन्मे
नाम भविष्याति ॥ पुनश्चाहं यदा भीमं रूपं कृत्वा हिमाचले
॥ ५० ॥ रक्षांसि भक्षयिष्यामि मुनीनान् त्राणकारणात् ॥ तदा

मास् मुनयः सर्वे स्तोष्यन्त्यानम्रमूर्तयः॥ ५१ ॥ भीमादेवीति वि-
ख्यातन्तन्मे नाम भविष्यति ॥ यदा ऽरुणाख्यस्त्रैलोक्ये म-
हाबाधां करिष्यति ॥ ५२ ॥ तदा ऽहम् भ्रामरं रूपङ्कृत्वा स-
ङ्ख्येयषट्पदम् ॥ त्रैलोक्यस्य हितार्थाय वधिष्यामि महासुरम्
॥ ५३ ॥ भ्रामरीति च मां लोकास्तदा स्तोष्यन्ति सर्वतः ॥ इ-
त्थं यदा यदा बाधा दानवोत्था भविष्यति ॥ ५४ ॥ तदा तदा
ऽवतीर्याहङ्करिष्याम्यरिसङ्क्षयम् ॥५५॥ ॥❁॥ ॥❁॥

इति श्रीमार्कण्डेयपुराणे सावर्णिके
मन्वन्तरे देवीमाहात्म्ये
नारायणीस्तुतिः॥ ११ ॥

स. देव्युवाच ॥ १ ॥ एभिस्तवैश्च मां नित्यं स्तोष्यते यस्समा- अ.
हितः ॥ तस्याहं सकलाम् बाधां शमयिष्याम्यसंशयम् ॥ २ ॥
५९. मधुकैटभनाशञ्च महिषासुरघातनम् ॥ कीर्तयिष्यन्ति ये तद्वद्- १०.
धं शुम्भनिशुम्भयोः ॥ ३ ॥ अष्टम्याञ्च चतुर्दश्यां नवम्या-
ञ्चैकचेतसः ॥ श्रोष्यन्ति चैव ये भक्त्या ममं माहात्म्यमुत्तमम् ॥
न तेषान्दुष्कृतं किंचिद् दुष्कृतोत्था न चापदः ॥ भविष्यति
न दारिद्र्यं न चैवेष्टवियोजनम् ॥ ५ ॥ शत्रुतो न भयन्तस्य
दस्युतो वा न राजतः ॥ न शस्त्रानलतोयौघात्कदाचित्सम्भवि- ५९.

ष्यति ॥ ६ ॥ तस्मान्ममैतन्माहात्म्यम् पठितव्यं समाहितैः ॥
श्रोतव्यञ्च सदा भक्त्या परं स्वस्त्ययनम् महत् ॥ ७ ॥ उप-
सर्गानशेषांस्तु महामारीसमुद्भवान् ॥ तथा त्रिविधमुत्पातम्
माहात्म्यं शमयेन्मम ॥ ८ ॥ यत्रैतत्पठ्यते सम्यङ्नित्यमाय-
तने मम ॥ सदा न तद्विमोक्ष्यामि सांनिध्यन्तत्र मे स्थितम् ॥
॥ ९ ॥ बलिप्रदाने पूजायामग्निकार्यें महोत्सवे ॥ सर्वम् ममै-
तच्चरितमुच्चार्यं श्राव्यमेव च ॥ १० ॥ जानता ऽजानता वापि
बलिपूजान्तथाकृताम् ॥ प्रतीक्षिष्याम्यहम् प्रीत्या वह्निहोम-

स. न्तथाकृतम् ॥ ११ ॥ शरत्काले महापूजा क्रियते या च वार्षिकी ॥ अ.
तस्याम् ममैतन्माहात्म्यं श्रुत्वा भक्तिसमन्वितः ॥ १२ ॥ सर्व-
६०. बाधाविनिर्मुक्तो धनधान्यसुतान्वितः ॥ मनुष्यो मत्प्रसादेन ११.
भविष्यति न संशयः ॥ १३ ॥ श्रुत्वा ममैतन्माहात्म्यन्तथा
चोत्पत्तयः शुभाः ॥ पराक्रमश्च युद्धेषु जायते निर्भयः पुमान् ॥
॥ १४ ॥ रिपवः संक्षयं यान्ति कल्याणञ्चोपपद्यते ॥ नन्दते च
कुलम् पुंसाम् माहात्म्यम् मम शृण्वताम् ॥ १५ ॥ शान्तिकर्मणि
सर्वत्र तथा दुःस्वप्नदर्शने ॥ ग्रहपीडासु चोग्रासु माहात्म्यं ६०.

शृणुयान्मम ॥ १६ ॥ उपसर्गाः शमं यान्ति ग्रहपीडाश्च दारु-
णाः ॥ दुःस्वप्नश्च नृभिर्दृष्टं सुस्वप्नमुपजायते ॥ १७ ॥ बालग्रहा-
भिभूतानाम् बालानां शान्तिकारकम् ॥ संघातभेदे च नृणाम्
मैत्रीकरणमुत्तमम् ॥१८॥ दुर्वृत्तानामशेषाणाम् बलहानिकरम् पर-
म् ॥ रक्षोभूतपिशाचानाम् पठनादेव नाशनम् ॥ १९ ॥ सर्वम्ममै-
तन्माहात्म्यम् मम सन्निधिकारकम् ॥ पशुपुष्पार्घधूपैश्च गन्धदी-
पैस्तथोत्तमैः ॥ विप्राणाम् भोजनैर्होमैः प्रोक्षणीयैरहर्निशम् ॥ अ-
न्यैश्च विविधैर्भोगैः प्रदानैर्वत्सरेण या ॥ २१ ॥ प्रीतिर्मे क्रिय-

स. ते सा ऽस्मिन्सकृत् सुचरिते श्रुते ॥ श्रुतं हरति पापानि तथा अ.
ऽरोग्यम् प्रयच्छति ॥ २२ ॥ रक्षां करोति भूतेभ्यो जन्मनां की-
६१. र्तनम् मम ॥ युद्धेषु चरितं यन्मे दुष्टदैत्यनिबर्हणम् ॥ २३ ॥ १२.
तस्मिञ्छ्रुते वैरिकृतम् भयम् पुंसां न जायते ॥ युष्माभिः स्तुत-
यो याश्च याश्च ब्रह्मर्षिभिः कृताः ॥ ॥ २४ ॥ ब्रह्मणा च कृता-
स्तास्तु प्रयच्छन्ति शुभाम् मतिम् ॥ अरण्ये प्रान्तरे वापि दावा-
ग्निपरिवारितः ॥ २५ ॥ दस्युभिर्वा वृतः शून्ये गृहीतो वापि श‍-
त्रुभिः ॥ सिंहव्याघ्रानुयातो वा वने वा वनहस्तिभिः ॥ २६ ॥ ६१.

राज्ञा क्रुद्धेन वाज्ञप्तो वध्यो बन्धगतोऽपि वा ॥ आघूर्णितो वा वातेन स्थितः पोते महार्णवे ॥ २७ ॥ पतत्सु चापि शस्त्रेषु संग्रामे भृशदारुणे ॥ सर्वबाधासु घोरासु वेदनाभ्यर्दितोऽपि वा ॥ २८ ॥ स्मरन्ममैतच्चरितं नरो मुच्येत संकटात् ॥ मम प्रभावात्सिंहाद्या दस्यवो वैरिणस्तथा ॥ २९ ॥ दूरादेव पलायन्ते स्मरतश्चरितम् मम ॥ ३० ॥ ऋषिरुवाच ॥ ३१ ॥ इत्युक्त्वा सा भगवती चण्डिका चण्डविक्रमा ॥ ३२ ॥ पश्यतामेव देवानान्तत्रैवान्तरधीयत ॥ ते ऽपि देवा निरातंकाः स्वाधिकारान्यथापुरा ॥ ३३ ॥ यज्ञ-

स. भागभुजः सर्वे चक्रुर्विनिहतारयः ॥ दैत्याश्च देव्या निहते शुम्भे अ.
देवरिपौ युधि ॥ ३४ ॥ जगद्विध्वंसिनि तस्मिन्महोग्रे ऽतुलविक्र-
६२. मे ॥ निशुम्भे च महावीर्ये शेषाः पातालमाययुः ॥ ३५ ॥ एवम् १२
भगवती देवी सा नित्या ऽपि पुनः पुनः ॥ सम्भूय कुरुते भूप
जगतः परिपालनम् ॥ ३६ ॥ तयैतन्मोह्यते विश्वं सैव विश्वम्
प्रसूयते ॥ सा याचिता च विज्ञानन्तुष्टा ऋद्धिम् प्रयच्छति ॥३७॥
व्याप्तन्तयैतत्सकलम् ब्रह्माण्डम् मनुजेश्वर ॥ महाकाल्या महाकाले
महामारीस्वरूपया ॥ ३८ ॥ सैव काले महामारी सैव सृष्टिर्भव- ६२.

त्यजा ॥ स्थितिं करोति भूतानां सैव काले सनातनी ॥ ३९ ॥
भवकाले नृणां सैव लक्ष्मीर्वृद्धिप्रदा गृहे ॥ सैवाभावे तथा ल-
क्ष्मीर्विनाशायोपजायते ॥ ४० ॥ स्तुता सम्पूजिता पुष्पैर्धूपगन्धा-
दिभिस्तथा ॥ ददाति वित्तम् पुत्रांश्च मतिं धर्मे तथा शुभाम् ॥ ४१ ॥

इति श्रीमार्कण्डेयपुराणे सावर्णिके
मन्वन्तरे देवीमाहात्म्ये
देवीवाक्यम् ॥ १२ ॥

ऋषिरुवाच ॥ १ ॥ एतत्ते कथितं राजन् देवीमाहात्म्यमु-
त्तमम् ॥ एवम्प्रभावा सा देवी ययेदं धार्यते जगत् ॥ २ ॥ विद्या
तथैव क्रियते भगवद्विष्णुमायया ॥ तया त्वमेष वैश्यश्च तथै-
वान्ये विवेकिनः ॥ ३ ॥ मोह्यन्ते मोहिताश्चैव मोहमेष्यन्ति
चापरे ॥ तामुपैहि महाराज शरणम् परमेश्वरीम् ॥ ४ ।
आराधिता सैव नृणाम् भोगस्वर्गापवर्गदा ॥ ५ ॥ मार्कण्डेय उवाच ॥
॥ ६ ॥ इति तस्य वचः श्रुत्वा सुरथः स नराधिपः ॥ ७ ॥
प्रणिपत्य महाभागन्तमृषिं संशितव्रतम् ॥ निर्विण्णोऽतिममत्वे-

न राज्यापहरणेन च ॥ ८ ॥ जगाम सद्यस्तपसे स च वैश्यो महामुने ॥ सन्दर्शनार्थमम्बाया नदीपुलिनसंस्थितः ॥ ९ ॥ स च वैश्यस्तपस्तेपे देवीसूक्तम् परं जपन् ॥ तौ तस्मिन्पुलिने देव्याः कृत्वा मूर्तिम् महीमयीम् ॥ १० ॥ अर्हणाञ्चक्रतुस्तस्याः पुष्पधूपाग्नितर्पणैः ॥ निराहारौ यताहारौ तन्मनस्कौ समाहितौ ॥ ॥ ११ ॥ ददतुस्तौ बलिञ्चैव निजगात्रासृगुक्षितम् ॥ एवं समाराधयतोस्त्रिभिर्वर्षैर्यतात्मनोः ॥ १२ ॥ परितुष्टा जगद्धात्री प्रत्यक्षम् प्राह चण्डिका ॥ १३ ॥ देव्युवाच ॥ १४ ॥ यत्प्रार्थ्यते त्वया

भूप त्वया च कुलनन्दन ॥ १५ ॥ मत्तस्तत्प्राथ्यर्तां सर्वम् परि-
तुष्टा ददामि ते ॥ १६ ॥ मार्कण्डेय उवाच ॥ १७ ॥ ततो व-
व्रे नृपो राज्यमविभ्रंश्यन्यजन्मनि ॥ १८ ॥ अत्रैव च निजं राज्यं
हतशत्रुबलम् बलात् ॥ सोऽपि वैश्यस्ततो ज्ञानं वव्रे निर्विण्णमान-
सः ॥ १९ ॥ ममेत्यहमिति प्राज्ञस्संगविच्युतिकारकम् ॥ २० ॥
देव्युवाच ॥ २१ ॥ स्वल्पैरहोभिर्नृपते स्वं राज्यम् प्राप्स्यते भ-
वान् ॥ हत्वा रिपूनस्खलितन्तव तत्र भविष्यति ॥ मृतश्च भूय-
स्सम्प्राप्य जन्म देवाद्विवस्वतः ॥२३॥ सावर्णिको मनुर्नाम भवा-

न्भुवि भविष्यति ॥ वैश्यवर्य त्वया यश्च वरोऽस्मत्तोऽभिवाञ्छितः
॥ २४ ॥ तम् प्रयच्छामि संसिद्ध्यै तव ज्ञानम् भविष्यति ॥२५॥
मार्कण्डेय उवाच ॥ २६ ॥ इति दत्वा तयोर्देवी यथाभिलषितम्
वरम् ॥ बभूवान्तर्हिता सद्यो भक्त्या ताभ्यामभिष्टुता॥ एवन्देव्या
वरं लब्ध्वा सुरथः क्षत्रियर्षभः ॥ २८ ॥ सूर्याज्जन्म समासाद्य
सावर्णिर्भविता मनुः ॥ सावर्णिर्भविता मनुः ॥ २९ ॥ ॥॥

इति श्रीमार्कण्डेयपुराणे सावर्णिके
मन्वन्तरे देवीमाहात्म्ये
सम्पूर्णम् ॥ १३ ॥

समाप्त